दानं ग्रामादागच्छति पर्वतादवरोहति कारक इति किं वृक्षस्य पर्णं पतति कुड्यस्य पिण्डः पतति अ
कथितं च कारकं कर्मसंज्ञं भवति माणवकं पन्थानं पृच्छति कारक इति किं माणवकस्य पितरं पन्थानं
पृच्छति कारकसंज्ञकेषु चानेन विशेषणेन कार्यं वदामो वेदितव्यं। २२ ध्रुवमपायेऽपादानं ध्रुवय
दपाययुक्तं अपाये साध्ये यदवधिभूतं तत्कारकं अपादानसंज्ञं भवति ग्रामादागच्छति पर्वतादव
रोहति सार्थाद्धीनः रथात्पतितः। जुगुप्साविरामप्रमादार्थानामुपसंख्यानं अधर्माज्जुगुप्सते अधर्मा
द्विरमति धर्मात्प्रमाद्यति अपादानप्रदेशाः अपादाने पञ्चमीत्येवमादयः २३ भीत्रार्थानां भयहेतुः भी
भयार्थानां धातूनां प्रयोगे त्राणार्थानां च भयहेतुर्यस्तत्कारकमपादानसंज्ञं भवति चौरेभ्यो
बिभेति चौरेभ्य उद्विजते त्राणार्थानां चौरेभ्यस्त्रायते चौरेभ्यो रक्षति भयहेतुरिति किं अरण्ये
बिभेति अरण्ये त्रायते २४ पराजेरसोढः पराजेः प्रयोगे सोढो योऽर्थः सोढुं न शक्यते तत्
कारकमपादानसंज्ञं भवति अध्ययनात्पराजयते असोढ इति किं शत्रून्पराजयते २५ वारणार्थानामी
प्सितः वारणार्थानां धातूनां प्रयोगे ईप्सितो योऽर्थस्तत्कारकमपादानसंज्ञं भवति प्रवृत्तिवि
घातो वारणं यवेभ्यो गां निवारयति तिलेभ्यो गां निवर्तयति ईप्सित इति किं यवेभ्यो गां रक्षति
क्षेत्रे क्षेत्रमनीप्सितं २६ अन्तर्धौ येनादर्शनमिच्छति व्यवधानमन्तर्धिः अन्तर्धिनिमित्तं येनादर्शनमा
त्मन इच्छति तत्कारकमपादानसंज्ञं भवति उपाध्यायादन्तर्धत्ते उपाध्यायान्निलीयते मा मामुपा
ध्यायो द्राक्षीदिति विलीयते अन्तर्धाविति किं चौरान्न दिदृक्षते इच्छतीति ग्रहणं किं अदर्शनेच्छायां
सत्यां सत्यपि दर्शने यथा स्यात् २७ आख्यातोपयोगे आख्याता प्रतिपादयिता उपयोगो नियम
पूर्वकं विद्याग्रहणं उपयोगे साध्ये आख्याता प्रतिपादयिता उपयोगो नियमपूर्वकं विद्याग्र

णं उपयोगे साध्ये आख्याता प्रतिपादयिता उपयोगो नियमपूर्वकं ग्रहणं तत्कारकमपा
दानसंज्ञं भवति उपाध्यायादधीते उपाध्यायादागमयति उपयोग इति किं नटस्य शृ
णोति ग्रंथकस्य करोति ॥ जनिकर्त्तुः प्रकृतिः जनेः कर्त्ता जनिकर्त्ता जन्यर्थस्य जन्मनः
कर्त्ता जायमानस्तस्य या कोऽजायते ॥ भुवः प्रभवः कर्त्तुरिति वर्त्तते भवनं भूः प्रभव
तीत्यस्मादिति प्रभवः भूकर्त्तुः प्रभवो यत्तत्कारकमपादानसंज्ञं भवति हिमवतो गं
गा प्रभवति कश्मीरेभ्यो वितस्ता प्रभवति प्रथमत उपलभ्यत इत्यर्थः ॥ कर्म्मणा यम
भिप्रैति स संप्रदानं कर्म्मणा करणभूतेन कर्त्ता यमर्थमभिप्रैति तत्कारकं संप्रदानसं
22 ज्ञं भवति अन्वर्थसंज्ञां ददाति माणवकाय भि अन्वर्थसंज्ञाविज्ञानात् ददातिकर्म्मणेति
विज्ञायते उपाध्यायाय गां ददाति माणवकाय भिक्षां ददाति क्रियाग्रहणमपि कर्त्तव्यं क्रियया
यमभिप्रैति तत्संज्ञं भवति श्राद्धाय निगर्हते युद्धाय संनह्यते पत्ये शेते पत्ये तु ते संप्र
दानप्रदेशाः चतुर्थी संप्रदाने इत्येवमादयः कर्म्मणः करणसंज्ञा वक्तव्या संप्रदानस्य च क
र्मसंज्ञा पशुना रुद्रं यजते पशुं रुद्राय ददातीत्यर्थः ॥ रुच्यर्थानां प्रीयमाणः रुचिना
समानार्थाः रुच्यर्थाः अन्यकर्त्तृकोऽभिलाषो रुचिः रुच्यर्थानां धातूनां प्रयोगे प्रीयमा
णोऽर्थस्तत्कारकं संप्रदानसंज्ञं भवति देवदत्ताय रोचते मोदकः यज्ञदत्ताय स्वदते दधि दे
वदत्तस्य स्वाभिलाषस्य मोदकः कर्त्ता प्रीयमाण इति किं देवदत्ताय रोचते मोदकः पथि
22 श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः श्लाघह्नुङ्स्थाशप इत्येतेषां ज्ञीप्स्यमानो योऽर्थस्तत्का
रकं संप्रदानसंज्ञं भवति ज्ञीप्स्यमानो ज्ञापयितुमभिप्रेतः बोधयितुमभिप्रेतः देवदत्ताय
श्लाघते देवदत्तं श्लाघमानः स्वाभिप्रायं ज्ञापयितुमिच्छतीत्यर्थः एवं देवदत्ताय ह्नुते यज्ञ
दत्ताय ह्नुते स्या देवदत्ताय तिष्ठते यज्ञदत्ताय तिष्ठते यज्ञदत्ताय तिष्ठते शपे देवदत्ताय ह्नुते य
ज्ञदत्ताय ह्नुते स्या देवदत्ताय तिष्ठते यज्ञदत्ताय तिष्ठते शपे देवदत्ताय शपते यज्ञद
त्ताय शपते ज्ञीप्स्यमान इति किं देवदत्तं श्लाघते ... धारेरुत्तमर्णः धारयतेर्धातोः प्रयो.

उत्तमर्णो योऽर्थस्तत्कारकं संप्रदानसंज्ञं भवति उत्तमं ऋणं यस्य स उत्तमर्णः ; कस्य चोत्त
मर्णः यदीयं धनं धनस्वामी प्रयोक्ता उत्तमर्णः संप्रदानसंज्ञो भवति देवदत्ताय शतं
धारयते यज्ञदत्ताय सहस्रं धारयति उत्तमर्णे इति किं देवदत्ताय शतं धारयते ग्रामे स्पृ
हेरीप्सितः ; स्पृहेरीप्सितो योऽर्थश्चुरादावदन्तः पठ्यते तस्य ईप्सितो योऽर्थस्तत्कारकं संप्रदान
संज्ञं भवति ईप्सितमिति अभिप्रेतमुच्यते पुष्पेभ्यः स्पृहयति फलेभ्यः स्पृहयति ईप्सित
इति किं पुष्पेभ्यः स्पृहयति वने ; क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ; अमर्षः ; क्रोधप्र
पूर्वको द्रोहः ; अक्षमा ईर्ष्या ; गुणेषु दोषाविष्करणमसूया ; क्रुधादीनां धात्वर्थानां यं प्रति
कोपः तत्कारकं संप्रदानसंज्ञं भवति क्रोधस्तावत्कोप एव द्रोहादयोऽपि कोपप्रभवा एव
गृह्यन्ते तस्मात्सामान्येन विशेषणं यं प्रति कोपः ; इति देवदत्ताय क्रुध्यति देवदत्ताय द्रुह्यति
देवदत्तायेर्ष्यति देवदत्तायासूयति यं प्रति कोप इति किं भार्यामीर्ष्यति मैनामन्यो द्राक्षी
दिति ; क्रुधद्रुहोरुपसृष्टयोः कर्म ; पूर्वेण संप्रदानसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीय
ते क्रुधद्रुहोरुपसृष्टयोः सम्बन्धी यं प्रति कोपस्तत्कारकं कर्मसंज्ञं भवति देवदत्तमभि
क्रुध्यति देवदत्तमभिद्रुह्यति उपसृष्टयोरिति किं देवदत्ताय क्रुध्यति देवदत्ताय द्रुह्यति देवद
त्ताय राध्यति यज्ञदत्ताय ईक्षते नैमित्तिकः पृष्टः सन् देवदत्तस्य दैवं पर्यालोचयतीत्यर्थः ; प्र
त्याङ्भ्यां श्रुवः पूर्वस्य कर्ता ; प्रत्याङ्भ्यां पूर्वस्य शृणोतेः ; कर्म संप्रदानसंज्ञं भवति कीदृशं
पूर्वस्याः क्रियायाः कर्ता प्रतिपूर्व आङ्पूर्वश्च शृणोतिरभ्युपगमे प्रतिज्ञाने वर्तते स चाभ्युपगमः परेण
प्रयुक्तस्य सतो भवति तत्र प्रयोक्ता पूर्वस्याः क्रियायाः कर्ता संप्रदानसंज्ञो भवति देवदत्ताय
गां प्रतिशृणोति यज्ञदत्ताय गामाशृणोतीति ; अनुप्रतिगृणश्च ; अनुप्रतिपूर्वस्य पूर्वस्य
कर्तानु ... पूर्वस्य प्रतिपूर्वस्य च गृणातेः ; कारकं पूर्वस्याः क्रियायाः ; कर्ता ...

दानसंज्ञं भवति पोत्रेनुगृणाति पोत्रेनुगृणाति होताप्रथमं शंसति नमनुः; ओ होताकृयाति
अनुगिरं प्रतिगिरमिति किमस्तुः ओ होतानमुच्यते होते प्रतिगृणाति होता नुगृ संतप्रो
का तानुकृयन्ती त्यर्थः; ४० साधकतमं करणं क्रियाप्रसिद्धौ यन्त्र कृष्णो पकारकं विवक्षितं तत्सा
सू धकतमं कारकं करणसंज्ञं भवति दात्रेण लुनाति परशुना छिनत्ति नमस्कृत्य गृह्णाति गंगा
यां घोषः कूपे गर्गकुलमिति ४१ दिवः कर्म च पूर्वेण करणसंज्ञायां प्राप्तायां कर्मसंज्ञावि
का धीयते दिवः साधकतमं यत्कारकं तत्कर्मसंज्ञं भवति चात्करणसंज्ञं च अक्षान्दीव्य
ति अक्षैर्दीव्यति ४२ परिक्रयणे सम्प्रदानमन्यतरस्यां साधकतममिति वर्तते पूर्वेणाक
सू रणसंज्ञायां सम्प्रदानसंज्ञा पक्षे विधीयते परिक्रयणे यत्साधकतमं कारकं तदन्यतरस्यां
सम्प्रदानसंज्ञं भवति परिक्रयणं वेतनादिना नियतकालस्वीकरणमानयति कार्ये एवं शु
तायपरिक्रीतेनुरूपतिशतेन परिक्रीतो नुरूपतिसहस्राय परिक्रीतो नुरूपति ४३ आधारोधिकरणं आप्रियते यस्मिन्नेव क्रिया इत्याधारः कर्तृकर्मणोः क्रिया
श्रयभूतयो धारणात् क्रियायाः परंपराधारो यत्कारकं तदधिकरणसंज्ञं भवति कटे आस्ते
स्थाल्यामोदनं पचति अधिकरणप्रदेशाः आधिकरणे चेत्येवमादयः ४४ अधिशी
ङ् स्थासां कर्म पूर्वेणाधिकरणसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते अधिपूर्वाणां शी
ङ् स्थासां यत्कारकं तदाधारो यत्कारकं कर्मसंज्ञं भवति ग्राममधिशेते ग्राममधितिष्ठति ग्राम
मध्यास्ते ग्राममभिविशते कथं कल्याणेभिनिवेशः ४५ अभिनिविशश्च अभिनिपूर्वस्य विशते
राधारो यत्कारकं कर्मसंज्ञं भवति ग्राममभिनिविशते कथं कल्याणेभिनिवेशः; यायावरे
ज्ञा यस्मिन्नभिनिविशते अन्यतरस्यामिति वर्तते परिक्रयणे सम्प्रदानमन्यतरस्यामिति
ते; सा च व्यवस्थिता विभाषा विज्ञायते ४६ उपान्वध्याङ्वसः उप अनु अधि आङ् इत्येवं पूर्व
स्य वसतेराधारो यत्कारकं तत्कर्मसंज्ञं भवति ग्राममुपवसति सेना ग्राममनुवसति ग्राममधिवसति

ति ग्राममावसति वसतेरुपलक्षणं स्वप्रतिषेधो वक्तव्यः ग्रामे उपवसति भोजननिवृत्तिं करोतीत्यर्थः ४७ कर्त्तुरीप्सिततमं कर्म्म कर्त्तुः क्रियया यदाप्तुमिष्टतमं तत्कारकं कर्म्मसंज्ञं भवति ओदनं पचति कटं करोति ग्रामं गच्छति कर्त्तुरिति किं माषेष्वश्वं बध्नाति कर्म्मण ईप्सिता माषा न कर्त्तुः तमग्रहणं किं पयसौदनं भुङ्क्ते कर्मेत्यनुवर्त्तमाने पुनः कर्म्मग्रहणं आधारनिवृत्त्यर्थं आधारस्यैव हि स्यात् गेहं प्रविशतीति सूक्तान्येव तु ओदनं पचतीत्येवमादिषु न स्यात् पुनः कर्म्मग्रहणात् सर्वत्र सिद्धं भवति कर्म्मप्रदेशाः कर्मणि द्वितीयेत्येवमादयः ४८ तथा युक्तं चानीप्सितं येन प्रकारेण कर्त्तुरीप्सिततमं क्रियया युज्यते तेनैव प्रकारेण यदनीप्सितमपि युक्तं भवति तस्य कर्म्मसंज्ञा विधीयते ईप्सितादन्यत् सर्वमनीप्सितं द्वेष्यमितरच्च विषं भक्षयति चौरान् पश्यति ग्रामं गच्छन् वृक्षमूलान्युपसर्पति ४९ अकथितं च अकथितं च यत्कारकं तच्च कर्म्मसंज्ञं भवति केनाकथितमपादानादिभिर्विशेषकथाभिः परिगणनं कर्त्तव्यं दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ ब्रुविशासिगुणेन च यत्सचते तदकीर्त्तितमाचरितं कविना उपयुज्यते इत्युपयोगः पयः प्रभृति तस्य निमित्तं गवादि तस्यैवमुपयुज्यमानपयः इति प्रभृतिनिमित्तस्य गवादेः कर्म्मसंज्ञा विधीयते पाणिनीयाः स्पष्टाः गां दोग्धि पयः इति पाणिन्यादिकमप्युपयोगनिमित्तं तस्य कस्मान्न भवति तेन तदपि विशिष्टाग्रत्रकरणादिसमानत्वान्मा भूत् अपूर्वविधाविति ब्रुविशासिगुणेन च यत्सचते तदकीर्त्तितमाचरितं कविना तदकथितं मुक्तं स्वत्रकारेण दुहिर्गां दोग्धि पयः याचिः पौरवं गां याचते रुधिर्गामवरुणद्धि व्रजं प्रच्छिर्माणवकं पन्थानं पृच्छति भिक्षिः पौरवं गां भिक्षते चिर्वृक्षमवचिनोति फलानि ब्रुविर्माणवकं धर्मं ब्रूते शास्ति माणवकं धर्मं [illegible] ते दुहादीनामप्रधाने वृत्तिर्नीहृत्तो कर्म्मणि प्राप्ते चेत्येषां तिष्ठत [illegible] लविपते दुहो दौ [illegible] प्रधाने दुह्यते गौः पयो देवदत्तेन एवं दोह्यते गौः पयो देवदत्तेन एवं गाः

ऋतं दण्डे नेदण्डिना वा ग्रामः। प्राप्तं जीयते। जितो वा देवदत्तेन वाहिनी कृष्णां प्रधाने उच्यते ॐ छोवा
मामो ग्रामं अजा नीयते नीजा वा ग्रामं क्रियते हृतो वा कंसो ग्रामं देवदत्तेन अन्येषां ग
ति बोधाय्यो नाकालाध्यिभावे देकुर्णा नाप्रधाने प्रधाने च गमयति ग्रामं देवदत्तमन्यः। ग
म्यते ग्रामो देवदत्तं यज्ञदत्तेन ग्रामो देवदत्तमुन्येन एवं बोधाय्यो नाममपि मासमा
का ले चैत्रः। मासमास्वयति तमपम। मासमास्यते चैत्रः। मासमास्यते चैत्रमजपरेण अधा
श्री दिष्टेवं कथितोदाहरणानि १५० गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणाम
कारिकर्ता स णौ। अर्थग्रहः। प्रत्येकमभिसंबध्यते गत्यर्थानां बुद्ध्यर्थानां प्रत्यवसानार्था
नां शब्दकर्मकाणां अकर्मकाणां चाणि यः कर्ता स णौ कर्म संज्ञो भवति
तृ० गच्छति माणवको ग्रामं गमयति माणवकं ग्रामं याति माणवको ग्रामं या
३४ पयति माणवकं ग्रामं गत्यर्थेषु नीवह्योः प्रतिषेधो वक्तव्यः। नयति भारं देवदत्तः। नाय
यति भारं देवदत्तेन वहति भारं देवदत्तः वाहयति भारं देवदत्तेन वहेरनियन्तृकर्तृ
कस्येति वक्तव्यम् इह प्रतिषेधो माभूत् वहन्ति यवान् बलीवर्दाः वाहयति यवान् बली
वर्दान् कृषीवलः। बुध्यते माणवको धर्मं बोधयति माणवकं धर्मं वेत्ति माणवको
धर्मं वेदयति माणवकं बुद्ध्यर्थाः। प्रत्यवसानमभ्यवहारः। भुङ्क्ते माणवक ओदनं
भोजयति माणवकमोदनं अश्नाति माणवक ओदनं आशयति माणवकमोदनं आदि खाद्योः प्रति
षेधो वक्तव्यः। अत्ति माणवक ओदनं आदयते माणवकेनौदनं खादति माणवकः खाद
यति माणवकेन भक्षेरहिंसार्थस्य प्रतिषेधो वक्तव्यः। भक्षयति पिण्डीं देवदत्तेन हिंसा
र्थस्येति किं भक्षयति बलीवर्दाः सस्यं भक्षयति बलीवर्दान् सस्यं प्रत्यवसानार्थाः अधि
ते माणवको वेदं अध्यापयति माणवकं वेदं पठति माणवको वेदं पाठयति मा
णवकं वेदं शब्दकर्मणः अकर्मकाणां आस्ते देवदत्तः आसयति देवदत्तं शे
ते देवदत्तः शाययति देवदत्तमपरः प्रयुङ्क्ते गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः
५८ हृक्रोरन्यतरस्याम् अणिकर्ता स णौ विकल्पेन कर्मसंज्ञो भवति। करोति कटं देवदत्तः

कर्त्तृप्राप्तेन यो यत्नक्रियत्तस्य स कर्म्मसंज्ञो भवति हरति भारं माणवकः हारयति भारं मा-
णवकं माणवकेनेति वा करोति कटं देवदत्तः कारयति कटं देवदत्तं देवदत्तेने-
ति वा अभिवादिदृश्योरात्मनेपदप्रयोगे वा नेत्याभिवदति गुरुं देवदत्तः अभिवाद-
यते गुरुं देवदत्तं देवदत्तेनेति वा पश्यन्ति भृत्या राजानं दर्शयते भृत्यान् राजा भृ-
त्यैरितिवा आत्मनेपद इति किं दर्शयति चैत्रं मैत्रं नयः प्राप्तविकल्पत्वान्नित्यम-
येव अभिवादयति गुरुं माणवकेन पिता इति अप्राप्तविकल्पत्वान्नित्यमेव प्र-
नेत्रा कर्त्ता स्वतन्त्र इति प्रधानभूत उच्यते अगुणीभूतो यः क्रियाप्रसिद्धौ स्वातन्त्र्ये-
ण विवक्षितो यः स कारकं कर्त्तृसंज्ञं भवति देवदत्तः पचति स्थाली पचति कर्त्तृप्र-
देशाः कर्त्तृकरणयोस्तृतीयेत्येवमादयः प्रयोजको हेतुश्च तदित्यनेनानन्त-
रः प्रसम्बध्यते तत्र प्रयोजकः स्वतन्त्रप्रयोजको निपात्यता तस्मात् स्वतन्त्रस्य प्रयो-
जको योऽर्थः स कारकं हेतुसंज्ञं भवति चकारात्कर्त्तृसंज्ञा च संज्ञासमावेशा-
र्थश्चकारः कुर्वाणं प्रयुङ्क्ते कारयति हारयति हेतुत्वात्सिद्धौ तिमितः कर्त्तृत्वाच्च
कर्त्तृप्रत्ययः नोच्यते हेतुप्रदेशा हेतुमति चेत्येवमादयः ५४ प्राग्रीश्वरान्निपा-
ताः अधिरीश्वरमुक्ते इति वक्ष्यति प्रागेतस्मादवधेर्यानि तत ऊर्द्ध्वमनुक्रमिष्यामो निपा-
तसंज्ञास्ते वेदितव्याः चतुर्थ्यतिचादयो सत्वे चकारादयश्च प्रवचनसंज्ञा समावे-
शार्थं प्राग्प्रूपसर्गकर्म्मप्रवचनीयसंज्ञाभिः सह निपातसंज्ञा समाविशति रेफोच्चा-
रण ईश्वरेतो सुनकसुनाविष्यपमवधिमोविज्ञायी जिरीश्वरा द्वीश्वरा त्रास्मूनु-
कुन्नेजनन्त चादयोऽसत्वे समासे ष्यवस्थायीभावो लौकिके चातिवर्त्तते ५५ चादयोऽस-
त्वे चादयो निपातसंज्ञा भवति नचेत्सत्वे वर्त्तते प्रसज्यप्रतिषेधोऽयं सत्वमित्यभि-
द्रव्यमुच्यते च वा ह अह एव एवं नूनं शश्वत् युगपत् उपत्कं चित् नेत् चेत् नत्
णं कच्चित् यत्र नह हन्त माकिः नकिः माङ् ङ काम वि तु एवमाद्यः माङि लुङिति

ङ्गनं भवति मा भवान् मा करिष्यति नन्नु वाव त्वा वद् त्वौ त्वो । वौ औ ओ ब ट्वौ ब
ट्स्वा हा स्वधा उमन याहि खलु किल अथ अव अध अ स्मा स्मि अ इ उ ऊ ए ऐ ओ
औ इत्यन्नु उकन् अदल आन कुवेला यां यात्रा यां मात्रो या यावत् यथा किम्
कायतो नन्नु युगपत् चिकहा हा हे है पाद्दे घट वत् पत्राम् अमू आम् शम् शकम् सम
हि हि मन्त्र शु कम् सम् सुकम् अनुकमू उकमू नहिकम् सन्यमू ऋजमू श्रजा ग्राज
वा सुधा वत् वत नो चेन्नु नहि आन कथं कुत्र । कुत्र्नु अन्त एवं हौ हे हा इतो आको स्विन्नु
सवत्र यौ दिष्ट्या पशु किंदमस दृष्टा नुषकं अंगा सु कजा नक भाजक अपर्यवेत्य
३५ नवत्र वे टचाट चाट कम् कुम स्वधु तैवि नु पर्यो दुम । किम सी म नौ म उच्चै प्राउ,
पसर्गविभक्तिस्वरप्रतिरूपकाश्च निपाताः । उपसर्गप्रतिरूपकाः । अवदत्तं विदत्तं
च प्रदत्तं चादिकर्मणि तिनि दत्तमनुदत्तं च सुदत्तमिति चेष्यते । अच उपसर्गात्तइ
ति तत्त्वं न स्यात् । दुर्नीत दुर्नय । उपसर्गादिति णत्वं न भवति । अमरत्व इति विध
शुर्वै पुरुषः । वर्ग्य वैर्यो । निपातमधे देहः । स्वरादिनिपातमव्ययमित्येव मादि
यी । अथ प्रादयः । प्रादयो सत्वे निपातसंज्ञा भवति प्र परा अप सम् अनु अव निर् दुर् वि आ
ङ् नि अधि अपि अति सु उत् अभि प्रति परि उप एषु एकयोगकर्तृ उपसर्गसंज्ञा विधीय
ते ये उपसर्गाः क्रियायोग इति चार्थीति उपसर्गसंज्ञा माभूत् एव पतासेना ५८
उपसर्गाः क्रियायोगे प्रादयः । क्रियायोगे उपसर्गसंज्ञा भवति प्रणयति परिणयति प्र
णायकः परिणायकः । क्रियायोग इति किं प्रगतो नायकोऽस्मादेश प्रनायको देशः
मरुतः स्यापत्यं मारुद्दत्तो मरुत्त । अच उपसर्गादिति तत्त्वं यथा स्यात् श्रत्
अंतर् श्च उपसर्गसंज्ञा न भवति अद्यो उपसर्गाद्दत्ता : उपसर्गे घो : कि
एव मादयः गतिश्च गतिसंज्ञकाश्च प्रादयो भवन्ति क्रियायोगे प्रकृत्य प्र
कृत प्रहृत्य यत्कृत गति सत्त्वे यथा स्यात् उपसर्गाः

त्वयपास्यात्तोऽपसर्गसंज्ञा माभूत् ऊरीस्यादिति सूत्रोपसर्गप्रादुर्भ्यामस्तिर्यच्चपर इति वार्त्तिक्षु
सज्येत् णत्वकारसंज्ञासमावेशार्थं। ऊरीति ग्रामेषिक्ते गति रनंतर इति स्वरः। उपसर्गादिति
षत्वणत्वे भवतः। कारिकाशब्दः स्थापसंख्यानकारिकाकृत्य कारिकाकृतं यत्कारिकाक
रोति पुनश्चनसो छंदसि गतिसंज्ञो भवतः। इति वक्तव्यं पुनरुत्स्यूतं वासो देयं गतिर्गता
विति निघातो भवति च नोदितं। गतिरनंतर इति स्वरः। गतिप्रदेशाः। कुगतिप्रादय इत्येव
मादयः। ऊर्यादिच्विडाचश्च ऊर्यादयः च्व्यंता डाजंताश्च क्रियायोगे गतिसंज्ञा भवंति
च्विडाचौ। कृभ्वस्तियोगे विधानं तत्र सा एव चर्यार्थात् ऊर्यादीनामपि तैरेव योगे गतिसंज्ञा वि
धीयते ऊरीउररीशब्दावंगीकरणे विस्तारे च ऊरीकृत्य ऊरीकृतं यदूरीकरोति उररीकृ
त्य उररीकृतं यदुररीकरोति पांपी ताली आताली वेताली धूसा आकला सशकला भ्रंशक
ला ध्वंसकला एते शकलादयो हिंसायां शकलाकृत्य संकलाकृत्य भ्रंशकलाकृत्य ध्वं
सकलाकृत्य गुलुगुधा पीडार्थे गुलुगुधाकृत्य सजूः सहार्थे सजूःकृत्य फलू फली विक्ली
आक्ली आक्ली इति विकारे फलूकृत्य फलीकृत्य विक्लीकृत्य आक्लीकृत्य आलोष्टी केवा
साली वर्षाली वार्षाली मस्मसा मसमसा। एते हिंसायां श्रौषट् वौषट् वषट् स्वाहा स्व
धा प्रादुस् श्रत् आविस् च्व्यंताः। विभाषापि शुक्लीकृत्य शुक्लीकृतं यच्छुक्लीकरोति डाचः पट
पटाकृत्य पटपटाकृतं यत्पटपटाकरोति ६० अनुकरणं चानितिपरं इतिपरो यस्मान्न इ
ति वकुर्वीतिः। अनुकरणमनितिपरं क्रियायोगे गतिसंज्ञं भवति खाट्कृत्य खाट्कृतं य
त्खाट्करोति। अनितिपरमिति किं खाडिति कृत्वा निरष्ठीवत् ६१ आदरानादरयोः सद
सती प्रीतिसंभ्रम आदरः। परिभवोऽप्यनादरः। आदरानादरयोर्यथाक्रमं सदसत्
शब्दौ गतिसंज्ञौ भवतः। सत्कृत्य सत्कृतं यत्सत्करोति असत्कृत्य असत्कृतं यदसत्करोति
आदरानादरयोरिति किं सत्कृत्वा काण्डं गतः। असत्कृत्वा काण्डं गतः। ६२ भूषणेऽलम् अलमिति
प्रतिषेधे सामर्थ्ये पर्याप्तौ भूषणे चेति विभूषणमुपादीयते भूषणे योऽलंशब्दः सग

ति संज्ञो भवति अलंकृत्य अलं कृतं यद् अलंकरोति भूषण इति किं अलं भुक्त्वा ओदनं गतः ।
६२ अन्तरपरिग्रहे अन्तःशब्दो अपरिग्रहार्थे गतिसंज्ञो भवति परिग्रहः स्वीकरणं त-
दभावे गतिसंज्ञा विधीयते अन्तर्हत्य अन्तर्हतं यदन्तर्हन्ति अपरिग्रह इति किं अन्तर्हत्वा
मूषिकां श्येनो गतः । परिगृह्य गत इत्यर्थः । अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गसंज्ञा वक्त-
का व्या अन्तर्धा अन्तर्धिः । अन्तर्णयति ६४ कणेमन[illegible] सी श्रद्धाप्रतीघाते कणेशब्दो मनःशब्दश्च
प्रि श्रद्धाप्रतीघाते गतिसंज्ञो भवतः । कणे [illegible] यः । पिबति मनोहत्य पयः पिबति ता-
का वत्पिबति यावत्तृष्णाया अभिलाषो निवृत्तः । [illegible] प्रतिहन्त्यर्थः । श्रद्धाप्रतीघात इति किं
कणे हत्वा गतः । मनो हत्वा गतः । ६५ पुरोऽव्य[illegible] अस्तिभाव्य यो तः । पुरःशब्दोऽव्ययं गति-
२८ संज्ञो भवति समासस्वरोपचाराः प्रयोजनं पुरस्कृत्य पुरस्कृतं यत्पुरस्करोति अव्ययमि-
36 ति किं पूः पुरौ पुरः कृत्वा काण्डं गतः । ६६ अस्तं च अस्तंशब्दो मकारान्तोऽव्ययं अनुपलब्धौ व-
र्तते स गतिसंज्ञो भवति अस्तंगत्य सविता पुनरुदेति अस्तंगतानि धनानि यदस्तं गच्छति
अव्ययमित्येव अस्तं कृत्वा काण्डं गतः । क्षिप्तमित्यर्थः । ६७ अच्छ गत्यर्थवदेषु अच्छशब्दोऽव्य-
यम् अभिशब्दस्यार्थे वर्तते स गत्यर्थेषु धातुषु वदतौ च गतिसंज्ञो भवति अच्छगत्य अच्छगतं
यदच्छगच्छति वदतौ अच्छोद्य अच्छोदितं यदच्छवदति अव्ययमित्येव उदकमच्छं गच्छति ६८ अद-
दोऽनुपदेशे अदःशब्दस्त्यदादिषु पठ्यते सोऽनुपदेशे गम्यमाने गतिसंज्ञो भवति उपदे-
शः परार्थः । स्वयमेव तु यदा बुद्ध्या परामृशति तदा नास्ति उपदेश इति सोऽस्य विषयः । अदःकृ-
त्य अदस्कृतं यददस्करोति अनुपदेश इति किं अदः कृत्वा काण्डं गत इति परस्य कथयति ६९ ति-
रोऽन्तर्द्धौ अन्तर्धिर्व्यवधानं तत्रति रःशब्दो गतिसंज्ञो भवति तिरोभूय तिरोभूतं य-
त्तिरोभवति अन्तर्द्धाविति किं तिरो भूत्वा स्थितः । पार्श्वतो भूत्वेत्यर्थः । ७० विभाषा कृञि अन्तर्द्धौ
वति किं तिरो भूत्वा स्थितः । पार्श्वतो भूत्वेत्यर्थः । ७० विभाषा कृञि अन्तर्द्धौ विवित्ति वर्त्तते ति-
त विभाषेयं तिरः । कृञः । करोतौ परतो विभाषा गतिसंज्ञो भवति तिरस्कृत्य तिरस्कृतं

यत्निम्स्करणात्ति... ... ...
कृञ्जीतिवर्त्तेते । तथा ज्ने त्वा ज्ञे नु ... विभाषा ... ... तथाजे कृत्य ... विभाषा
कृञ्जीतिवर्त्तते । इति संज्ञो भवति । तथाजे कृत्य भूतनि ... ... विभाषा
वर्त्तते तो कृञ्जि विभाषा गति संज्ञो ... कृञ्जीतिवर्त्तते । साक्षात्प्रभृतीनि च ... कृत्वा मिथ्या
७२ साक्षात्प्रभृतीनि च विभाषा कृञ्जीतिवर्त्तते साक्षात्प्रभृति षु च्च्यर्थे वचने साक्षात्कृत्य साक्षात्कृत्वा ...
कृञि गति संज्ञानि भवंति साक्षात्प्रभृति पुनः ... लोचनाः ... उदक ... गति सं
कृत्य मिथ्या कृत्वा साक्षान्मिथ्या चिंतामद्रौ लोचना ... लवण ... विकसने ... ने ...
... संसर्ग । विभाषा ... ... विभाषा
योगे नलवणादीनां ... ... ७३ अनत्याधाने उरसि मनसी ... कृञीति
ने विकसने विकंपने ... नमः । तदभावे अनत्याधाने उरसि कृत्वा मनसि कृत्वा अनत्या
कृञ्जीति वर्त्तते अनत्याधानमुपश्लेषणं तदभावे ... उरसि कृत्वा मनसि कृत्य ... विभाषा कृञ्जीति वर्त्तते च
भाषा कृञि गति संज्ञो भवतः । उरसि कृत्य ७४ मध्ये पदे निवचने च विभाषा कृञि ग
धानं इति किं उरसि कृत्वा पाणिं शेते । मध्ये पदे निवचने इत्येते ... अनत्याधाने विभाषा कृञि ग
... दनत्याधाने इति च मध्ये पदे निवचने इत्येते ... निवचनं वचनाभावः । निव
... संज्ञा भवंति मध्ये कृत्य मध्ये कृत्वा पदे कृत्य पदे कृत्वा अनत्याधाने इत्येव ... पदे कृत्वा
चने कृत्य निवचने कृत्वा वाचं नियम्येत्यर्थः । अनत्याधाने इत्येव ... कृत्वा
... ७५ नित्यं हस्ते पाणावुपयमने कृञीति वर्त्तते हस्ते कृत्य पाणौ कृत्य पाणौ दारकर्म
... गति संज्ञो भवतः । उपयमने उपयमनं दारकर्म हस्ते कृत्य ... पाणौ ... गतः । ७६ प्राध्वं बंध
गति संज्ञो भवतः । उपयमने उपयमनं दारकर्म हस्ते कृत्वा ... अनुकूल्ये वर्त्तते ... अनुकूल्ये बंधन
कृत्वेत्यर्थः । उपयमने ... अनुकूल्ये वर्त्तते प्राध्वं कृत्य प्राध्वं कृत्य
ने कृञीति वर्त्तते प्राध्वमिति मकारांतमव्ययं । आनुकूल्ये ... संज्ञो भवति ... जीविकोपनिषदावौपम्ये कृ
ञ्जीति वर्त्तते तदा प्राध्वं ... कृञि नित्यं गति संज्ञौ ... ७७ जीविकोपनिषदावौपम्ये कृ
... भवति ... बंधन इति किं प्राध्वं कृत्वा गतः । ... विषये कृञि नित्यं गति संज्ञौ
... करोति ... इति किं ... जीविकां कृत्वा गतः । ७८ ...
... ...

...गुणमात्रे ... ञाप रोपि पूर्वापरत्वं प्रयोगे क्रियायाः नच परो रोगानियां
...प्यते याति ... कांचिद्दाति केवलमुपसर्गयोगे क्रियायोग एवान्यत्र स्तीनि ...
...श्च व्यवहिताश्च गत्युपसर्गाः छन्दसि ... नियांति हन्ति ना हन्ति निमुष्टिना निहन्ति मुष्टिना ८९ व्यवहिता
...भि, आयाहि ८ कर्मप्रवचनीयाः। कर्मप्रवचनीया इत्यधिकृत्य वेदितव्याः। ... भियो हि मरुद्भिरोम
पूर्वस्मात्... क्रमिष्याम। कर्मप्रवचनीयसंज्ञा वेदितव्याः। आविर्भूव इति यावत्। वक्ष्यति
अनुर्लक्षणे लक्षणेत्थंभूताख्यानसहितामनुप्रावर्षत्। ... कर्मप्रवचनीयसंज्ञा
नीयः पुरो ... नीये त्वेवमादयः। ... अनुलक्षणे अनुरुक्तो लक्षणे द्योत्ये कर्मप्रवच
नीयसंज्ञो भवति जपमनुप्रावर्षत्। जपहेतुकं प्रवर्षणमित्यर्थः। ... कर्मप्रवच
नसिक्ताः। किमर्थमिदमुच्यते यावता लक्षणेत्थंभूताख्यानभागवीप्सासु इत्यनेन
नसिद्धा। ... कर्मप्रवचनीयसंज्ञा हेत्वर्थे ... हेतुतृतीया वाधित्वा द्वितीये
वयथा स्यात्। तृतीयार्थे अनुरुक्तस्तृतीयार्थे द्योत्ये कर्मप्रवचनीयसंज्ञो भव
ति नदीमन्ववसिता सेना। पर्वतेन ... सम्बन्धेत्यर्थः। ९१ हीने। हीने इति वर्त
उच्यते सचोत्कृष्टो ... हीने द्योत्ये कर्मप्रवचनीयसंज्ञो भवति अनु शाकटायनं वैयाकरणाः। अन्वर्जुनं योद्धारः। ९२ उ
पोऽधिके च उपशब्दोऽधिके हीने च द्योत्ये कर्मप्रवचनीयसंज्ञो भवति उपखार्यां द्रोणः।
उप निष्के कार्षापणम्। हीने उप शाकटायनं वैयाकरणाः। ९३ अपपरी वर्जने अपपरी
वर्जने द्योत्ये कर्मप्रवचनीयसंज्ञौ भवतः। ... सम्बाधिना कस्मात् ... वर्जने
अप त्रिगर्तेभ्यो वृष्टो देवः। परि त्रिगर्तेभ्यो वृष्टो देवः। वर्जनमिति किं ओदनं परिषिञ्चति ९४ आ
ङ् मर्यादावचने आङित्येष शब्दो मर्यादावचने कर्मप्रवचनीयसंज्ञो भवति ...
... अभिविधौ ... आपाटलिपुत्राद्वृष्टो देवः। आ कुमारं ...
... आ संसारात् ... आ मथुरायाः ...
९५ लक्षणेत्थं ...

वीप्सायां च विषयभूतायां प्रति परि अनु इत्येते कर्मप्रवचनीयसंज्ञा भवन्ति। लक्षणे
तावत् वृक्षं प्रति विद्योतते विद्युत् वृक्षं परि वृक्षमनु इत्थंभूताख्याने साधुर्देवदत्तो
मातरं प्रति मातरं परि मातरमनु भागे यदत्र मां प्रति स्यात् मां परि मामनु वीप्सायां
वृक्षं वृक्षं प्रति सिंचति परिसिंचति अनुसिंचति लक्षणादिष्विति किं ओदनं परिषिंच
ति अथ परिप्रयोगे पंचमी कस्मान्न भवति पंचम्यपाङ्परिभिरिति वर्जनविषये
सा विधीयते अपपरिवद्धसाहचर्यात्। ८९ अभिरभागे लक्षणादिष्वभागवर्जितेष्वभि
कर्मप्रवचनीयसंज्ञो भवति वृक्षमभि विद्योतते विद्युत् साधुर्देवदत्तो मातरमभि वृक्षं
वृक्षमभि सिंचति अभाग इति किं भागः स्वीक्रियमाणोंऽशो भागः यदत्र ममाभिष्यात् तद्दीय
ता यदत्र मम भवति तद्दीयतामित्यर्थः। ९० प्रतिः प्रतिनिधिप्रतिदानयोः। मुख्यसदृशः
प्रतिनिधिः दत्तस्य प्रतिनिर्यातनं प्रतिदानं प्रतिनिधिविषये प्रतिदानविषये च प्रतिः
कर्मप्रवचनीयो भवति अभिमन्युरर्जुनतः प्रति माषानस्मै तिलेभ्यः प्रतियच्छति। ९१ अधि
परी अनर्थकौ अधिपरी अनर्थकौ अनर्थान्तरवाचिनौ कर्मप्रवचनीयसंज्ञौ भवतः।
कुतोऽध्यागच्छति कुतः पर्यागच्छति गत्युपसर्गसंज्ञाबाधनार्थौ कर्मप्रवचनीयसंज्ञौ भव
तः कुतोऽध्यागच्छति कुतः पर्यागच्छति गत्युपसर्गसंज्ञाबाधनार्था कर्मप्रवचनीयसंज्ञा वि
धीयते। ९२ सुः पूजायां सुः शब्दः पूजायामर्थे कर्मप्रवचनीयसंज्ञो भवति सु सिक्तं भवता
सुस्तुतं भवता धात्वर्थे। स्तूयते उपसर्गसंज्ञा अयं षत्वं न भवति पूजायामिति किं सुषिक्तं
किं तवात्र ९३ अतिरतिक्रमणे च अतिशब्दः अतिक्रमणे पूजायां च कर्मप्रवचनीयसंज्ञो
भवति निष्पन्नेऽपि फले क्रियायाः प्रवृत्तिरतिक्रमणं अतिसिक्तमेव भवता अतिस्तुतमेव
भवता पूजायां अतिसिक्तं भवता अतिस्तुतं भवता शोभनं कृतमित्यर्थः। ९४ अपिः पदा

र्थसंभावनान्ववसर्गगर्हासमुच्चयेषु पदार्थे संभावनेऽन्ववसर्गे गर्हायां समु-
च्चये च वर्त्तमानोऽपि शब्दः कर्मप्रवचनीयसंज्ञो भवति पदान्तरस्याप्रयुज्यमानस्या-
र्थः पदार्थः । सर्पिषोऽपि स्यात् मधुनोऽपि स्यात् मात्रा बिन्दुः स्तोकमपि अस्यार्थे चिन्ताद्योत-
का यते संभावनमधिकार्थवचनेनाक्रियते घातादिष्वपि अपि सिंचेन्मूलसह-
शि स्रमपि स्तुयात् राजानं । अन्ववसर्गः । कामचारानुज्ञानं अपि सिंच अपि स्तुहि । गर्हा नि-
का न्दा । धिक् जाल्मं देवदत्तं अपि सिंचेत् पलाण्डुं अपि स्तुयात् वृषलं समुच्चये अपि सिंच अ-
पि स्तुहि सिंच च स्तुहि च उपसर्गसंज्ञाबाधनार्थं वचनं भवति ९५ अधिरीश्वरे ईश्वरः
सू८ स्वामी स च स्वमपेक्षते तदर्थं स्वस्वामिसंबन्धे अधिः कर्मप्रवचनीयसंज्ञो भवति तत्र
३४ कदाचित् स्वामिनः कर्मप्रवचनीयविभक्तिः सप्तमी भवति कदाचित् स्वात् अधि ब्रह्मद-
त्ते पंचालाः । अधि पंचालेषु ब्रह्मदत्त इति ९६ विभाषा कृञि अधिः करोतौ विभाषा कर्म-
प्रवचनीयसंज्ञो भवति यदत्र मामधिकरिष्यति कर्मप्रवचनीयसंज्ञापक्षे गतिसंज्ञा-
बाधनात् तिङि चोदात्तवतीति निघातो न भवति ९७ लः परस्मैपदं ल इति षष्ठी आदेशा-
पेक्षा लादेशाः परस्मैपदसंज्ञा भवन्ति तिप् तस् झि सिप् थस् थ मिप् वस् मस् शतृक्व-
सुश्च परस्मैपदप्रदेशाः । सिचि वृद्धिः परस्मैपदेष्वित्येवमादयः ९८ तङानावात्मनेप-
दं तङिति प्रत्याहारः तङानयोरात्मनेपदसंज्ञा विज्ञायते त आताम् झ थास् आथां ध्वं इट्
वहि महिङ् आनः खल्वपि शानच् कानचौ लङ्ग्रस्येव कानीकातिघानौ । आत्मनेपदे-
षु देशाः अनुदात्तङित आत्मनेपदमित्येवमादयः ९९ तिङस्त्रीणि त्रीणि प्रथममध्य-
मोत्तमाः । तिङोऽष्टादश प्रत्ययाः नव परस्मैपदसंज्ञकाः नव आत्मनेपदसंज्ञकाः । तत्र परस्मैपदे-
षु त्रयस्त्रिकाः यथाक्रमं प्रथममध्यमोत्तमसंज्ञा भवति आत्मनेपदेषु त्रयस्त्रिकाः । प्रथममध्य-

मोत्तम संज्ञा भवंति तिपूतस झीति प्रथमः पुरुषः सिपथस थ इति मध्यपुरुषः थास आथां
ध्वमिति मध्यमपुरुषः इड्वहिमहिङ् इत्युत्तमपुरुषः प्रथममध्यमोत्तमप्रदेशाः पुरुषप्रथ
मपुरुष एवमादयः १०० तान्येकवचनबहुवचनान्येकशः तानि तिङः स्त्रीणि त्रीणि पदानि एकव
चनद्विवचनद्विवचनबहुवचनसंज्ञानि भवंति एकशः एकैकंपदति तिबित्येकवचनं तसि
ति द्विवचनं झीति बहुवचनं एवंसर्वत्र एकवचनद्विवचनबहुवचनप्रदेशाः द्व्येकयो
र्द्विवचनैकवचने बहुषु बहुवचनमित्येवमादयः १०१ सुपः तिङांत्रिकेषु एकवचनादि सं
ज्ञा विहिता सुपांत्रिकेषु विधीयते सुपश्च त्रीणि त्रीणि पदानि एकवचनद्विवचनबहुव
चनसंज्ञानि भवंति एकशः सु इत्येकवचनं औ इति द्विवचनं जसिति बहुवचनं एवंस
र्वत्र १०२ विभक्तिश्च विभक्तिसंज्ञकाश्च सुपो भवंति तिङश्च विभक्तिप्रदेशाः अष्टन आ विभक्तौ
इत्येवमादयः युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः तस्येत्यधिकारे स्थसमा
नति कादयो विहिताः तेषामयं पुरुषनियमः क्रियते युष्मद्युपपदे सति व्यवहिते चाव
वहिते च समानाधिकरणे समानाधिये तुल्यकारके स्थानिनि अपि प्रयुज्य
मानेपि मध्यमः पुरुषो भवति त्वं पचसि युवां पचथः यूयं पचथ अप्रयुज्यमानेपि प
चसि पचथः पचथ समानाधिकरणे इति किं त्वया पच्यते ओदनः १०४ प्रहासे च मन्योप
पदे मन्यतेरुत्तम एकवच्च प्रहासः परिहासः क्रीडप्रहासे गम्यमाने मन्योपपदे धातोर्मध्यमः
पुरुषो भवति मन्यतेश्चोत्तमः स चैकवद्भवति एहि मन्ये ओदनं भोक्ष्यसे भुक्तः सोतिथिभिः ए
हि मन्ये रथेन यास्यसि नहि यास्यसि यातस्ते पिता इति मध्यमोत्तमयोः प्रातयोरुत्तमसमध्यमो
विधीयते प्रहास इति किं एहि मन्यसे ओदनं भोक्ष्ये सुष्ठु च मन्यसे साधु च मन्यसे १०५ अस्मद्युत्त
मः उत्तमः पुरुषो नियम्यते अस्मद्युपपदे समानाधिकरणे समानाभिधेये प्रयुज्यमाने अप्र
प्रयुज्यमानेपि पचामि पचावः पचामः १०६ शेषे प्रथमः शेष इति मध्यमोत्तमविषयादन्यत्
च्यते यत्र युष्मदस्मदी समानाधिकरणे उपपदे न स्तः तत्र शेषे प्रथमः पुरुषो भवति पचति
पचतः पचन्ति १०७ परः सन्निकर्षः संहिता [illegible] ति तु यथैव वर्णे ते सन्निकर्षः प्रत्या

सन्निःपतोयः संतिकर्षः; वर्णानामर्द्धमात्राकालव्यवधानः; संसंहितासंज्ञो भवति दध्यत्र म
धत्र संहिताप्रदेशाः; संहितायामित्येवमादयः १०८ विरामोवसानं विरतिविरामो विर
म्यतेवानेनेति विरामः; सोवसानसंज्ञो भवति दधिमधुवृक्षः; वृक्षः; अवसानप्रदेशाः; वि
कावसानयो विसर्जनीयाः इत्येवमादयः; १०९ इक्ष्वुपसस्थानवर्तीग्रुद्गगणविवृतमुखत्वमे
ष्त्रिशब्दाव्युत्पन्नरूपाति द्विवृत्तिरिय काद्विकानाम ११० मूनिकाद्वि कावाकृतो द्वय माध्याये;
यस्यचतुर्थपादः। ११ नलोपो वर्णानां न खलु परमः; प्रत्ययविधिर्विधिर्नि पातो नात्ये वक्त
कारणमपि नभंगाः; प्रकृतयः; गुणोवावृद्धिर्वासन्त्रमुपकामाय जगतामुनेर्वाद्वीपुत्राद
पि नवसमर्थः; पदविधिः। समासोयं त्वयमोध्यायः; समर्थः पदविधिः परिभाषेयं;क
र्षि दिशु मासे पदाविधि ससर्व समर्थो वेदितव्यः; विधीयत इति विधिः; पदानां विधि पदवि
धिः ससर्वः समर्थो वेदितव्यः; विधीयत इति विधिः पादानां विधिः; पदाविधिः; पदविधि समासा
दि; समर्थः शक्तः; विग्रहवाक्यार्थाभिधानेवा; शक्तः; समर्थो वेदितव्यः; अथवा समर्थपदाश्र
यत्वात्समर्थः; समर्थानां पदानां संबद्धार्थानां संसृष्टानां विधिर्वेदितव्यः; वृत्पति द्वितीया
श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः; कष्टश्रितः; कष्टश्रितः; समर्थग्रहणं किं; पश्यपदेवद
तकष्टंश्रितो विष्णुमित्रो गुरुकुलं गन्तीयातवृक्षानाचेतगुणवचनेनकुं कुलयावंडः; शंकु
लाखंडः समर्थग्रहणं किं त्वं किं करिष्यसि शंकुलया खंडो देवदत्त उपलेन चतुर्थी तदर्थी
चलिदितसुखरक्षितैः; यूपाय दारु यूपदारु समर्थग्रहणं किं गच्छत्वं यूपाय दारु देवदत्तस्यगृ
हे पंचमी भयेन वृकेभ्यो भयं वृकभयं समर्थग्रहणं किं गच्छ त्वं मा वृकेभ्यः भयं देवदत्तस्य
मदत्ता नुषष्ठी राज्ञः पुरुषो राजपुरुषः समर्थग्रहणं किं भार्या राज्ञः पुरुषो देवदत्तस्य सप्तमी
शौंडैः अक्षेषु शौंडः अक्षशौंडः समर्थग्रहणं किं शक्तस्त्वमक्षेषु शौंडः पिबति पानागारे सप्तमी
हणं किं वर्ततो विधौ समर्थपरिभाषामात्रमनु निषेधदर्थो मानांतरं ज्ञापकेन विधात्रुकमात्रं तु
हमदेवदत्तोनुयमणादेशो निजाश्चतुर्भवति तस्या वा आवसतथ नगावत्त्वहु सर्वेषां नोमेति
तेपरतां परस्यांगवद्भवति सार ... नादानामपा ति दिशात्वे सुवनमा

मंत्रितमनुप्रविशतीति वदंति आमंत्रितस्यादिरुदात्तो भवति मास्तु पूर्वकस्यापि यथा स्यात् कुंडे
नाटन परशुना वृश्चन मद्राणां राजन्नु कश्मीराणां राजन्नु सुविति। किं पीच्छेपीच्छे मान्ने
आमंत्रित इति किं गृहे गार्ग्य; पदग्रहणं किं पूर्वस्य मा भूत् तेन ग्रहणं किं स्यात् अयमपि
यथा स्यात् आमकुंडे नाटन आम एकांतरमामंत्रितमनंतिक इत्येकांतरतो भवति स्वर
इति किं कूपे सिंचन धर्मेन न मनुष्यत्वेण त्वोप्रति नपरांगवद्भवति सुवंतस्य पराङ्गवद्भावे
समानाधिकरणस्योपसंख्यानं ज्ञनने तरुतमत्वात् तीक्ष्णया स्च्या सीव्यन् तीक्ष्णेन पर
शुना वृश्चन्नु अव्ययानां प्रतिषेधो वक्तव्यः उच्चैरधीयान् नीचैरधीयान्न २ प्र कडारास्समा
सः कडारसशब्दनान् प्राक् यानि इत ऊर्ध्वमनुक्रमिष्यामः। समाससंज्ञास्ते वेदितव्याः। वक्ष्य
ति यथा सादृश्ये यथावृद्धं ब्राह्मणानामंत्रयस्व प्राग्वचनं संज्ञासमावेशार्थं समासप्रो
दे नूपास्लतीया समास इत्येवमादयः; २ सह सुपा सविविवर्त्तते सहेति च सुपेति च एतद
धिकृतं वेदितव्यं यदित ऊर्ध्वमनुक्रमिष्यामः; तत्र दमुपास्येति द्रष्टव्यं वक्ष्यति । द्वितीयाश्रि
तातीतेति। द्वितीयांतं श्रि ताती तेति द्वितीयांतं श्रितादिभिः सह समस्यते सहग्रहणं योगविभा
गार्थं अनुवृत्तिबलात् सेनुभाव षन्तु ४ अव्ययीभावः; अव्ययीभाव इत्यधिकारो वेदितव्यः;
यानि इत ऊर्ध्वमनुक्रमिष्यामः; अव्ययीभावसंज्ञास्ते वेदितव्याः; वक्ष्यति यथा सादृश्ये य
थावृद्धं ब्राह्मणानामंत्रयस्व अन्वर्थसंज्ञा चेयं सहती पूर्वपदार्थप्राधान्यम् अव्ययीभावस्पद
र्यति अव्ययीभावस्य पुंदेन अव्ययीभावश्चेत्येवमादयः; ५ अव्ययं विभक्तिसमीपसमृ
द्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्ति
साकल्यांतवचनेषु सुप्सुपेति वर्त्तते विभक्त्यादिष्वर्थेषु यदव्ययं वर्त्तते तत्समर्थेन सु
वंतेन सह समस्यते अव्ययीभावश्च समासो भवति वचनग्रहणात् प्रत्येकमभिसंबध्यते विभ
क्तिवचने तावत् स्त्रीष्वधि कृत्य कथा व... इति अधिकुमारि सप्तम्यर्थे अव्ययं समीपे

कुंभस्य समीपं उपकुंभं उपमणिक समृद्धि ऋद्धेराधिक्यं समृद्धिः मद्राणां समृद्धिः सुमद्रं सु
गंधं वर्त्तते व्यृद्धि ऋद्धेरभावः दुर्यविकं दुर्यवनं अर्थाभावः अभावो मक्षिकाणां निर्मक्षि
कं निर्मशकं वर्त्तते अत्ययो भूतत्व अतिक्रमः अतीतानि हिमानि निर्हिमं निःशीतं वर्त्तते अ
का संप्रति उपभोगस्य वर्त्तमानकालप्रतिषेधः अघितितैरकं तैरकमाच्छादनं न स्यायमुपभो
ग्नि गकालीनं भवतीत्यर्थः शब्दप्रादुर्भावः प्रकाशता शब्दस्य इति पाणिनि पाणिनिशब्दो लो
का के प्रकाशत इत्यर्थः शब्दप्रादुर्भावं पश्चादनुरथं पादातं रथानां पश्चादित्यर्थः यथा यथा
र्थे यदव्ययं वर्त्तते तत्र समस्यते योग्यता वीप्सा पदार्थानतिवृत्तिः सादृश्यं चेति यथार्थाः अनु
८० रूपा सुरूपं रूपयोग्यं भवतीत्यर्थः प्रत्यर्थं यथाशक्ति आनुपूर्व्यमनुक्रमः अनुज्येष्ठं प्रवि
शंतु भवंतः ज्येष्ठानुपूर्व्येण योगपद्यमेककालता सचक्रं धेहि युगपच्चक्रं धेहि इत्यर्थः सा
दृश्यं तुल्यता किमर्थमिदमुच्यते यथार्थे एव सिद्धं गुणभूतेपि सादृश्ये यथा स्यात् सदृ
शः सख्या ससखि संपत्तिरनुरूप आत्मभावः समृद्धेरन्यः सब्रह्म बाभ्रवाणां सक्षत्रं शाल
ङ्कायनानां साकल्यमशेषता सतृणमभ्यवहरति सतुषं न किंचिदभ्यवहार्यं परित्यजतीत्य
र्थः अधिकार्थः वचनेन प्रतिपाद्यते अंतवचने अंतद्युति परिग्रहादासमाप्तिरुच्यते साग्नि
अधीते सेष्टि सपशुबंधं पशुबंधांतमधीत इत्यर्थः दूर्यं समाधिरसकाले अध्ययने भवतीति साक
ल्यात्पृथगुच्यते ७ यथाऽसादृश्ये यथेत्येतदव्ययं असादृश्ये वर्त्तमानं सुपा सह समस्यते
अव्ययीभावश्च समासो भवति यथावृद्धं ब्राह्मणानामंत्रयस्व ये ये वृद्धा यथाध्यापकं यथाभि
रूपं सादृश्यप्रतिषेधार्थं वचनं ८ यावदवधारणे यावदित्येतदव्ययमवधारणे वर्त्तमानं
सुपा सह समस्यते अव्ययीभावश्च समासो भवति अवधारणमियत्तापरिच्छेदः यावदम
त्रं ब्राह्मणानामंत्रयस्व यावंति अमत्राणि भवंति पंच षट् वा तावत आमंत्रयस्व अवधा
रणात् इति किं यावद्दत्तं तावद्भुक्तं नावधारयामि कियन्मया भुक्तमिति ९. सुप्प्रतिना मा
त्रार्थे मात्रा स्तोकमल्पमिति पर्याया नेन प्रतिना सह सुबंतं समस्यते अव्य

यीभावश्च समासो भवति अत्यन्त्र किंचित्तन्नाकं नाम कपाति स्वपत्राति लोकस्य प्रात्तिर्नोदशः । मात्रार्थ
इति किं वृक्षं प्रति विद्योतते विद्युत् सुविति वर्त्तमाने पुनः सुपू ग्रहणं अव्ययं निवृत्यर्थं अक्ष
शलाकासंख्याः परिणा अक्षाशलाकासंख्या शब्दाः परिणा सह समस्यन्ते अव्ययीभावश्च समासो भ
वति तत्र यदा सर्वे उत्तानाः पतन्ति अवाचो वा तदा पातयितारं जयति तस्यैवास्य विपातो इत्य यथा पा
ते सति जायते अक्षेण दंन तथा वृत्तं यथा पूर्वं जये अक्षपरि शलाकापरि संख्या एकपरि । द्विप
रि त्रिपरि चतुःपरि पंचसु त्वेकरूपासु जय एव भवति अत्रापयस्तानीयानाः पूर्वोक्तस्य यथान
तन्नू किमव अव्ययानचैकाच्चेदम शलाकयो । २० विभाषा विभाषेत्ययं मधिकारो वेदितव्यः यदित
ऊर्ध्वमनुक्रमिष्यामः तद्विभाषा भवति वक्ष्यति अपपरिबहिरंचवः पंचम्या अपत्रिगर्त्तं वृष्टो दे
वः अपत्रिगर्त्तं वृष्टो देवः अपत्रिगर्त्तेभ्यः बहिर्ग्रामं बहिर्ग्रामात् प्राक्ग्रामं प्राक्ग्रामात् अनुवहिः
नृवेन योगे पंचमी भावस्येन देवनापकं २१ आङ्मर्यादाभिविध्योः आङित्येतन्मर्यादायामभिवि
ध्यौ च वर्त्तमानं पंचम्यन्तेन सह विभाषा समस्यते अव्ययीभावश्च समासो भवति आपाटलिपु
त्रं वृष्टो देवः आपाटलिपुत्रात् अभिविधौ आकुमारं यशः पाणिनेः आकुमारेभ्यः २२ लक्षणेनाभि
प्रती आभिमुख्ये लक्षणं चिह्नं तद्वाचिना सुबन्तेन सह अभिप्रति शब्दाः आभिमुख्ये वर्त्तमानौ वा स
मस्यते अव्ययीभावश्च समासो भवति अभ्यग्नि शलभाः अग्निमभि प्रत्यग्नि अग्निं प्रति अग्निं ल
क्षीकृत्य अभिमुखं पतन्तीत्यर्थः लक्षणेनेति किं सुघ्नं प्रति गतः प्रतिनिवृत्य सुघ्नमेवाभिमुखं ग
तः अभिप्रती इति किं येनाग्निस्तेन गतः आभिमुख्य इति किं अभ्यंका गावः प्रत्यंका गावः । २३ अनु
र्यत्समया समया समीपं अनुर्यस्य समयासमीपवाची तेन लक्षणभूतेन वा सुबन्तेन सह स
मस्यते अव्ययीभावश्च समासो भवति अनुवनमशनिर्गता अनुरिति किं वनस्य समया यत्समयेति
मस्यते अनु विद्योतते विद्युत् अव्ययं विभक्तिसमीपसमृद्धि इत्येव सिद्धे पुनर्वचनं विभाषार्थं २४ यस्य
किं वृक्षमनु आयामो दैर्घ्यं अनुर्यस्यायामः । यस्यायामवाची तेन लक्षणभूतेने
चायामः लक्षणेनेति वर्त्तते अनुगंगं वाराणसी अनुयमुनं मथुरा यमुनायामेन
सह समस्यते अव्ययीभावश्च समासो भवति आयाम इति किं वृक्षमनु विद्योतते विद्युत् २५ तिष्ठद्गुप्रभृतीनि च तिष्ठद्गुप्रभृतीनि
मेषु वा यामो लक्ष्ये दृश्यन्ते अव्ययीभावसंज्ञानि भवन्ति तिष्ठद्गु
समुदाया एव निपात्यन्ते । तिष्ठद्गु वहद्गु

कालविशेषे तिष्ठन्ति गावो दोहनाय यस्मिन् काले सति तिष्ठद्गु खलेयवादीनि प्रपूर्माणान्यन्य
पदार्थे खलेयवादीनि रूढरूपाणि ज्ञेयमाणानि विभक्त्यन्तरेणानेन तं बध्यते अन्यपदा
र्थे चवर्त्तन्ते चकारो ऽवधारणार्थः। अपरः समासो न भवति परमं तिष्ठद्गु इति तिष्ठद्गुवह
कादु आयतीगवं खलेबुसं लूनयवं लूयमानयवं पूतयवं पूयमानयवं संहृतयवं सं
ह्रियमाणयवं संहृतबुसं संह्रियमाणबुसं एते कालशब्दाः। समभूमि। समपदाति
का सुषमं विषमं दुःषमं निःषमं अपसमं आयतीसमं प्राह्णं प्ररथं प्रमृगं प्रदक्षिणं संप्रतिअ
संप्रति पापसमं पुण्यसमं इत्यकर्म्म व्यतिहारे दंडादंडि मुसलामुसलि १७ पारे मध्ये षष्ठ्या वा
८(ष्ठीसमासे प्राप्ते न पक्षे वा ऽव्ययीभाव आरभ्यते वाचनात् षष्ठीसमासो विपक्षे ऽभ्यनुज्ञायते
पारे मध्ये तु कौ षष्ठ्यन्तेन सह एवि भाषा समस्येते अव्ययीभावश्च समासो भवति न तु नित्यो
गेन चानयो रेकारान्तत्वं चेनिपात्यते पारेगंगायाः। पारेगंगं षष्ठीसमासपक्षे गंगापारं गंगाम
ध्यं मध्ये विभाषयानुवाकृतिकल्पः क्रियते १८ संख्यावंश्येन विद्यया जन्मना प्राणिनामेकलक्ष
ण संतानो वंशः। तत्र भवो वंश्यः। तद्वाचिना सुबन्तेन सह संख्या समस्यते अव्ययीभावश्च
समासो भवति द्वौ मुनी व्याकरणस्य वंश्यौ द्विमुनि व्याकरणस्य त्रिमुनि व्याकरणस्य यदा तु
विद्यया सह तद्वतामभेदविवक्षा तदा सामानाधिकरण्यं भवति द्विमुनिव्याकरणं त्रिमुनिव्या
करणमिति १९ नदीभिश्च संख्येत्यनुवर्त्तते नदीवचनैः। सह समस्यते अव्ययीभाव
श्च समासो भवति समाहारे चायमिष्यते सप्तगंगं द्वियमुनं पंचनदं। सप्तगोदावरं २० अन्यप
दार्थे च संज्ञायां संख्येति निवृत्तं नदीग्रहणमनुवर्त्तते नदीभिः सह सुबन्तमन्यस्य पदार्थस्या
वर्त्तमानं संज्ञायां विषये समस्यते अव्ययीभावश्च समासो भवति विभाषाधिकारेपि नित्यस
मास एवायं न हि वाक्येन संज्ञा गम्यते उन्मत्तगंगं नाम देशः। लोहितगंगं तूष्णींगंगं शनैर्गं
गं अन्यपदार्थे इति किं कृष्णवेला संज्ञायामिति किं शीघ्रगंगो देशः। २१ तत्पुरुषः। तत्पुरुष इति संज्ञा
धिक्रियते प्राक् बहुव्रीहेर्यानित ऊर्ध्वमनुक्रमिष्यामः। तत्पुरुषसंज्ञास्ते वेदितव्याः। वक्ष्यति द्विती
याश्रितातीतपतितेति कष्टश्रितः नरकपतितः पूर्वाचार्यसंज्ञा चेयं महती संज्ञाकरणमन्वर्था
र्थमपि तन्नदीयस्य च नियमार्थं उत्तरपदार्थप्रधानस्तत्पुरुष इति तत्पुरुषप्रदेशास्तत्पुरुषे कृति

बहुलमित्येवमादयः २२ द्विगुश्च द्विगुश्च समासस्तत्पुरुषसंज्ञो भवति द्विगोस्तत्पुरुषत्वे स
मासान्ताः प्रयोजनं पंचराजी दशराजी दशराजी द्व्यहः त्र्यहः पंचगवं दशगवं २३ द्वितीयाश्रिता
तीतपतितगतात्यस्तप्राप्तापन्नैः सुप्सुपेति वर्त्तते तस्य विशेषणमेतत् द्वितीया श्रितादयश्च
द्वितीयान्तं सुबन्तं श्रितादिभिः सह समस्यते तत्पुरुषश्च समासो भवति कष्टं श्रितः कष्टश्रितः न
रकं श्रितः नरकश्रितः अतीतः कान्तारमतीतः कान्तारातीतः पतितः नरकं पतितः नरकपति
तः गतः ग्रामं गतः ग्रामगतः नरकं गतः नरकगतः अत्यस्तः तरंगानत्यस्तः तरंगात्यस्तः तुहि
नमत्यस्तः तुहिनात्यस्तः प्राप्तः सुखं प्राप्तः सुखप्राप्तः दुःखं प्राप्तः दुःखप्राप्तः आ
पन्नः सुखमापन्नः सुखापन्नः दुःखमापन्नः दुःखापन्नः श्रितादिषु गम्यगाम्यादीनामुपसंख्या
नं ग्रामं गमी ग्रामगमी ग्राममागामी ग्रामागामी ओदनं बुभुक्षुः ओदनबुभुक्षुः २४ स्वयं क्तेन स्वयमि
त्येतदव्ययं आत्मनेत्यस्यार्थे वर्त्तते तस्य द्वितीयया संबन्धो नुपपन्न इति द्वितीयाप्रकरण
मुत्समार्थे अनुवर्त्तते स्वयमित्येतत्सुबन्तं क्तान्तेन सुबन्तेन सह समस्यते तत्पुरुषश्च स
मासो भवति स्वयंधौतौ पादौ स्वयंविलीनमाज्यं ऐकपद्यमैकस्वर्यं च समासत्वाद्भवति २५
खट्वा क्षेपे खट्वारूढो द्वितीयान्तं क्तान्तेन सह क्षेपे गम्यमाने समस्यते तत्पुरुषश्च समासो
भवति क्षेपो निंदा स च समार्थः तेनैव विभाषाधिकारेपि नित्यसमास एवायं नहि वाक्येन क्षे
पो गम्यते खट्वारोहणं चेह विमार्गप्रस्थानस्योपलक्षणं सर्व एवाविनीतः खट्वारूढ इत्युच्य
ते खट्वारूढो जाल्मः खट्वाप्लुतः उत्पथप्रस्थित इत्यर्थः क्षेप इति किं खट्वामारूढः खट्वाप्लुतः २६
सामि सामीत्येतदव्ययं अर्द्धशब्दपर्यायः तस्यासत्त्ववाचित्वान्नु द्वितीयया नास्ति संबन्धः
तत्सुबन्तं क्तान्तेन सह समस्यते तत्पुरुषश्च समासो भवति सामिकृतं सामिपीतं सामिभुक्तं
ऐकपद्यमैकस्वर्यं च समासत्वाद्भवति २६ कालाः द्वितीयाक्तेनेति वर्त्तते कालवाचिनः सुबन्ता
द्वितीयान्ताः क्तान्तेन सह समस्यन्ते तत्पुरुषश्च समासो भवति अनत्यन्तसंयोगार्थं वचनमपा
मुहूर्त्तोश्चमाचमाः नैकदाचिदपगच्छन्ति कदाचिन्न रात्रिमहरति सन्नाम मुहूर्त्तो अहः संक्रान्ताः
रात्र्यारूढाः रात्रिसंक्रान्ताः मासप्रमितश्चन्द्रमाः मासं प्रमातुमारब्धः प्रतिपच्चन्द्रमा इत्यर्थः
२७ अत्यन्तसंयोगे च काल इत्यनुवर्त्तते क्तेनेति निवर्त्तं अत्यन्तसंयोगः कालसंयोगः कालस्य
स्वेन संबन्धिना व्याप्तिः कालवाचिनः सुबन्ता द्वितीयान्ता अत्यन्तसंयोगे गम्यमाने सुपा सह

न स्येतेन तत्पुरुषश्च समासो भवति मुहूर्तं सुखं मुहूर्तसुखं सर्वरात्रं कल्याणी सर्वरात्र
कल्याणी भवति २८ तृतीया तत्कृतार्थेन गुणवचनेन सह प्रकृत इति वर्त्तते तस्य विशेषणमेतत्
का तृतीयान्तं सुबन्तं गुणवचनेनार्थशब्देन च सह समस्यते तत्पुरुषश्च समासो भवति की
त्रि दृशेन गुणवचनेन तत्कृतेन तृतीयान्तकृतेन तृतीयान्तार्थकृतेनेति यावत् शङ्कुलया
का खंडः शंकुलाखंडः किरिणा काणः किरिकाणः अर्थशब्देन धान्येनार्थः धान्यार्थः तत्कृतेने
ति किं अक्ष्णा काणः गुणवचनेनेति किं गोभिर्वपावान् २९ पूर्वसदृशसमोनार्थकल
हनिपुणमिश्रश्लक्ष्णैः ३० पूर्वसदृशसमऊनार्थकलहनिपुणमिश्रश्लक्ष्ण इत्येतैः सह
५२ तृतीयान्तं समस्यते तत्पुरुषश्च समासो भवति अस्मादेव वचनात् पूर्वादिभिर्योगे तृती
या भवति हेतौ वा प्रकृत्या मासेन पूर्वः मासपूर्वः संवत्सरपूर्वः सदृशः मातृसदृशः पि
तृसदृशः ऊनार्थः माषोणोनः माषोनः कार्षापणोनः माषविकलः कार्षापणविकलः कल
हः असिकलहः असिकलहः वाक्कलहः वाचानिपुणः आचारनिपुणः मिश्रः गुडमिश्राः ति
लमिश्राः श्लक्ष्णः आचारश्लक्ष्णः माषादिषु वरस्योपसंख्यानं मासेनावरः मासावरः संवत्स
रावरः कर्तृकरणे कृता बहुलं तृतीयेति वर्त्तते कर्तरि करणे च या तृतीया तदन्तं बहुलं
कृदन्तेन सह समस्यते तत्पुरुषश्च समासो भवति पूर्वोपाधिष्वपि चार्यं बहुलग्रहणा
दत्रेण लूनवान् परशुना छिन्नवान् इति समासो न भवति पादहारकः गलेचोपकः इति च
भवति कृत्यैरधिकार्थवचने स्तुतिनिन्दाप्रयुक्तमध्यारोपितार्थवचनमधिकार्थवचनं क
र्तृकरणे कृत्यैः सहाधिकार्थवचने समस्यते तत्पुरुषश्च समासो भवति काकपेया नदी
श्वलेह्यः कूपः करणे बाष्पच्छेद्यानि तृणानि कण्टकसंचेयं ओदनं पूर्वस्यैवायं प्रपञ्चः कृत्यग्र
हणं यत्प्रग्रहणं कर्त्तव्यं इहमाभूत् काकैः पातव्या इति ३१ अन्नेन व्यञ्जनं तृतीयेति वर्त्तते
व्यञ्जनवाचि तृतीयान्तमन्नवाचिना सुबन्तेन सह समस्यते तत्पुरुषश्च समासो भवति संस्का
र्यमन्नं संस्कारकं व्यञ्जनं दध्ना उपसिक्त ओदनः दध्योदनः क्षीरोदनः वृत्तौ क्रियायाः अन्तर्भावात् अ
न्नव्यञ्जनयोः सामर्थ्यं ३२ भक्ष्येण मिश्रीकरणं मिश्रीकरणवाचि तृतीयान्तं भक्ष्यवाचिना सुबन्तेन सह स
मस्यते तत्पुरुषश्च समासो भवति खरविशदमभ्यवहार्यं भक्ष्यं तस्य संस्कारकं मिश्रीकरणं गुडेन
मिश्रा धाना गुडधानाः गुडपृथुकाः वृत्तौ क्रिया[illegible]भावात् पूर्ववत् रूपदयोः सामर्थ्यं ३३ चतु

थी तदर्थार्थ बलि हित सुख रक्षितैः । सुप्सुपेति वर्त्तते तस्य विशेषणमेतत् तदिति सर्वना
म्नो चतुर्थ्यंतस्यार्थः । पुरो मृ न्नूपते तस्मै इदं तदर्थं तदर्थ अर्थ बलि हित सुख रक्षित इत्येतैः
सह चतुर्थ्यंतं समस्यते तत्पुरुषश्च समासो भवति तदर्थेन प्रकृति विकारभावे समासो
येति वक्तव्यं यूपाय दारु यूपदारु कुंडलाय हिरण्यं कुंडलहिरण्यं इह न भवति रंधनाय स्थाली
अवहननायोलूखलमिति चतुर्थी चास्मादेव ज्ञापकात्तादर्थ्ये भवति तदर्थं अर्थेन नित्य
समासवचनं सर्वलिंगता च वक्तव्या ब्राह्मणार्थः सूपः ब्राह्मणार्थं पयः ब्राह्मणार्था यवागूः
बलि कुबेरबलिः महाराजबलिः हितं गोहितं अश्वहितं सुखं गोसुखं अश्वसुखं रक्षितं गोर
क्षितं सू ५ पंचमी भयेन सुप्सुपेति वर्त्तते तस्य विशेषणमेतत् पंचम्यंतं भयशब्देन सह वर्त्तते न
सह समस्यते तत्पुरुषश्च समासो भवति वृकेभ्यो भयं वृकभयं चोरभयं दस्युभयं भयभीतभी
तिभीभिरिति वक्तव्यं वृकभीतः वृकभीतिः वृकभीः पूर्वस्यैव बहुलग्रहणस्यायं प्रपंचः तथा च
ग्रामनिर्गतः अधर्मजुगुप्सुरित्येवमादिरपि द्रष्टव्यं भवति सू ६ अपेतापोढमुक्तपतितापत्रस्तैरल्पशः
अपेतापोढमुक्तपतितापत्रस्तैः इत्येतैः सह पंचम्यंतमल्पशः समस्यते तत्पुरुषश्च स
मासो भवति अपेतः सुखापेतः अपोढः कल्पनापोढः मुक्तः चक्रमुक्तः पतितः स्वर्गपतितः अ
पत्रस्तः तरंगापत्रस्तः अल्पश इति समासस्याल्पविषयमाचष्टे गल्यायै पंचमी समस्यते तेन स
र्वतो प्रासादात्पतितः भोजनादपत्रस्तः इत्येवमादौ न भवति कर्त्तृकरणे कृता बहुलं इत्यस्यैवा
यं प्रपंचः सू ७ स्तोकांतिकदूरार्थकृच्छ्राणि क्तेन स्तोकांतिकदूरार्थकृच्छ्र इत्येते पंचम्यंताः कृच्छ्र
शब्दाः पंचम्यंताः क्तांतेन सह समस्यंते तत्पुरुषश्च समासो भवति स्तोकात् स्तोकान्मुक्तः अल्पा
न्मुक्तः अंतिकादागतः अभ्याशादागतः दूरादागतः विप्रकृष्टादागतः कृच्छ्रात् कृच्छ्रान्मु
क्तः कृच्छ्राल्लब्धः पंचम्याः स्तोकादिभ्य इत्यलुक् प्राक् तत्सह स्त्रोपदेशोतिवक्तव्यं ज्ञातत्वात् परः शतः
परः सहस्राः राजदंतादित्वात्परनिपातः विनाप्येतानि निगमे सू ८ सप्तमी शौंडैः सप्तमीतशौं

गादिभिः। सुप्‌ समस्यते तत्पुरुषश्च समासो भवति अक्षेषु शौण्डः, अक्षशौण्डः, अक्षधूर्तः, अक्षाकि-
तवः, शौण्डः, धूर्त, कितव, व्याड, प्रवीण, संवीत, अन्तर, अन्तरङ्ग(?), व्यलेत्राविकरणात्‌ प्रधान(?)
पा वपक्षाने अधि पटु पण्डित चपल निपुण वृत्तौ प्रसक्ति क्रियायामन्तर्भावात्‌ अक्षादिष्वधि-
हि करणे सप्तमी ४० सिद्धशुष्कपक्वबन्धैश्च सप्तमीति वर्त्तते सिद्धशुष्कपक्वबन्ध इत्येतैः सह सु-
का प्‌ समस्यते समस्यते तत्पुरुषश्च समासो भवति सांकाश्यसिद्धः, कांपिल्यसिद्धः, शुष्क आतप-
शुष्कः, छायाशुष्कः; पक्वः स्थालीपक्वः, कुंभीपक्वः; बंधः चक्रबंधः, वकुल... स्यैवायं सुपाकर-
४१ णप्रपंच; ध्वांक्षेण क्षेपे ध्वांक्षेण अर्थग्रहणं ध्वांक्षवाचिना सह क्षेपे वर्त्तते सप्तम्यंतं समस्य-
४३ ते तत्पुरुषश्च समासो भवति क्षेपे गम्यमाने तीर्थे ध्वांक्ष इव तीर्थध्वांक्षः; अनवस्थित इ-
त्यर्थः, तीर्थकाकः तीर्थवायसः; क्षेप इति किं तीर्थे ध्वांक्षस्तिष्ठति ४२ कृत्यैर्ऋणे सप्तमीति वर्त्तते
कृत्यप्रत्ययांतैः सह सप्तम्यंतं समस्यते तत्पुरुषश्च समासो भवति ऋणे गम्यमाने यावय-
त्ययेन व्यच्यते मासेदेयं ऋणं मासदेयं संवत्सरेदेयं संवत्सरदेयं अह्नदेयं ऋणं ऋणग्रह-
णं चेति योगोपलक्षणार्थं इत्यापि समासो भवति पूर्वाह्णेगेयं साम प्रातरध्येयोनुवाकः, ऋण इति
किं मासे देया भिक्षा ४३ संज्ञायां संज्ञायां विषये सप्तम्यंतं सुपा सह समस्यते तत्पुरुषश्च समा-
सो भवति संज्ञा समुदायोपाधिः, तेन नित्य समास एवायं न हि वाक्येन संज्ञा गम्यते अरण्येतिल-
काः, अरण्येमाषाः, वने किंशुकाः, वने बिल्वकाः, कूपेपिशाचकाः, हलदन्तात्‌ सप्तम्याः संज्ञायामि-
त्यलुक्‌ ४४ क्तेनाहोरात्रावयवाः अहरवयवा रात्र्यवयवाश्च सप्तम्यन्ताः क्तेन सह समस्यते
तत्पुरुषश्च समासो भवति पूर्वाह्णकृतं अपराह्णकृतं पूर्वरात्रकृतं अपररात्रकृतं अवयवग्र-
हणं किं अह्नि भुक्तं अभ्युदयेपि चेत्यौचित्यदभावेन एतत्‌ दिवावृत्तं रात्रौ वृत्तं ...त्यासि ४५ तत्र तत्रे-
त्येतत्‌ सप्तम्यन्तं क्तान्तेन सह समस्यते तत्पुरुषश्च समासो भवति तत्रभुक्तं तत्रपीतं तत्रकृ-
तं तत्र सप्तम्यन्तेन ... तेन सह समस्यते तत्पुरुषश्च समासो भवति ... क्षेपे गम्यमाने सप्तम्यन्तं क्तान्ते-
न एकपदे मैकरूप्यं च समासे त्वा भवति ४६ क्षेपे क्षेपे निंदा क्षेपे गम्यमाने सप्तम्यन्तं क्तान्ते-

नसुहृत्समसस्यते तत्पुरुषश्च समासो भवति अव्ययत्वेन कालस्थितं चापलमेतत्तु अस्य नवस्थितं
नवैनदित्यर्थः । उदकेविशीर्णं प्रवाहेमूत्रितं भस्मनिहुतं निष्फलया क्रियया तं न देवस्तुत्यते
तत्पुरुषे कृतिबहुलमित्यलुक् ४५ पात्रेसमितादयश्च समुदाया एव निपात्यन्ते पात्रेसमिता
दयः । क्षुब्धाः तत्पुरुषसंज्ञं भवति क्षेपेगम्यमाने ये चात्र क्तान्तेन तत्र समासा से वा पूर्वे मेव
सिद्धे पुनः पाठोयुक्तार्थे स्यादिपरिग्रहणार्थः । पूर्वपदाद्यपाकृतत्वं ये त्वन्ये स्यादिति युक्तारोहादिषु
हि पात्रेसमितादयश्चपेठ्यन्ते पात्रेसमिताः पात्रेबहुलाः । अवधारणेन द्वौ वा यो गम्यते पात्रेए
व समिताः । नपुनः क्वचित्कार्ये इति उदुम्बरमशकादिषु उपयमनादेपूः । मातरिपुरुष इति
प्रतिबिद्धसेचनेन पिण्डीशूरादिषु निरीक्षतया अवधूतकृतत्वात्पाकुनिगमार्थः पात्रेसमिताः । पा
त्रेबहुलाः । उदुम्बरमशकाः । उदुम्बरकृमिः । कूपकच्छपः । अवटकच्छपः । कूपमण्डूकः । कुम्भमण्डूकः । उदपा
नमण्डूकः । नगरकाकः । नगरवायसः । मातरिपुरुषः । पिण्डीशूरः । गेहेशूरः । गेहेने
र्दी । गेहेक्ष्वेडी । गेहेविजिती । गेहेव्याडः । गेहेतृप्तः । गेहेधृष्टः । गेहेदृप्तः । आखनिकबकः । गोष्ठेशूरः
गोष्ठेविजिती गेहेव्याडः । गोष्ठेतृप्तः । गोष्ठेधृष्टः । गोष्ठेदृप्तः । आखनिकबकः । गोष्ठेशूरः । गोष्ठेवि
जिती गोष्ठेक्ष्वेडी गोष्ठेमेही गोष्ठेनर्दी गोष्ठेपटुः । गोष्ठेप्रगल्भः । कर्णेटिरिटिरा । कर्णेचुरचुरा
कर्णेकाकिकवधारणार्थः । येन समासोऽनेन भवति परमे पात्रेसमिता इति ४६ पूर्वकालैकसर्व
जरत्पुराणनवकेवलाः समानाधिकरणेन सुपूर्वपेति वर्तते तस्य विशेषणमेतत् पूर्वका
ल एक सर्व जरत्पुराण नव केवल इत्येते सुवन्ताः समानाधिकरणेन सुपा सह समस्यन्ते त
त्पुरुषश्च समासो भवति भिन्नप्रवृत्तिनिमित्तस्य शब्दस्यैकस्मिन्नर्थे वृत्तिः सामानाधिकरण्य
पूर्वकाल इत्यर्थनिर्देशः परिशिष्टानां स्वरूपग्रहणम् पूर्वकालः अपरकालेन समस्य
ते पूर्वस्नातानुलिप्तः कृष्टसमीकृतम् दग्धप्ररूढम् एक एकशाटी एकाभिक्षा सर्वदेवाः सर्वम
नुष्याः । जरन्नु जरद्गवः । जरद्धस्ती जरद्दाने जरद । पुराणपुरुषाः पुराणान्नं पुराणावसथं नवान्न
वान्नं नवावसथं केवलान्नं केवलावसथं समानाधिकरणेनेति किं एकस्याः शाटी ४७ दिकसं

संख्येसंज्ञायां (समानाधिकरणेनेति किं एकस्याः सूत्र्याः ४७ समानाधिकरणेन सुबन्तेन सह समस्यते
मापेत्रन्ववर्तते दिग्वाचिनः सूत्र्याः संख्या सुसमानाधिकरणेन सुबन्तेन संज्ञायां विषये पूर्वेषु कामेषु शमी ग्राम
तत्पुरुषश्च समासो भवति । दिग्वाचिनः सूत्र्याः संख्या संज्ञायां विषये पञ्चाम्रम् ।, ४८ तद्धितार्थो
संज्ञा संख्यो पञ्चाम्रा सप्तर्षयः संज्ञायामिति किं उत्तरावृक्षाः पञ्च ब्राह्मणाः ।, समाहारे
त्तरपद समाहारे च दिक्संख्ये इत्यनुवर्त्तते तद्धितार्थे विषयभूते उत्तरपदे परतः समाहारे
चाभिधेये दिक्संख्ये समानाधिकरणेन सह समस्येते तत्पुरुषश्च समासो भवति दिक्
पूर्वस्यां शालायां भवः दिक्पूर्वपदादसंज्ञायां ञः पौर्वशालः, आपर
४ तावत्तद्धितार्थे, पूर्वस्यां शालायां प्रियः समासे दिक्शब्दो न संभवति संख्यातद्धितार्थे पाञ्चनापि
शालः, उत्तरपदे पूर्वशाला प्रियः समाहारे पञ्चपूली दशपू
ली, उत्तरपदे पञ्चगवधनो दशगवधनः, समाहारे चायं तत्पुरुषः समाहारे चाद्रये
ति । पञ्चकपालो दशकपालः, उत्तरपदे पञ्चगवधनो दशगवधनः, समाहारे च
पूली पञ्चकुमारि दशकुमारि ४९ संख्यापूर्वो द्विगुः तद्धितार्थे त्यादि पञ्चसु कपालेषु संस्कृतः, पञ्चकपा
लः तद्धितार्थे नावत्पञ्चसु कपालेषु संस्कृतः, उत्तरपदे पञ्चना
वप्रियः समासः, सद्विगुसंज्ञो भवति सोद्विगोर्लुगनपत्ये इति लुक् उत्तरपदे पञ्चना
लो दशकपालः, संख्यापूर्वो द्विगुरित्येतेनागतस्य द्विगोर्लुगनपत्ये इति लुक् द्विगोरिति ङीप्भव
वप्रियः नावो द्विगोरिति समासान्तो भवति समाहारे पञ्चपूली दशपूली द्विगोरिति ङीप्भव
ति कुत्सितानि कुत्सनैः, कुत्सितवाचीनि सुबन्तानि कुत्सनवचनैः समानाधिकरणैः सह समस्यन्ते तत्पुरुषश्च समासो भवति वैयाकरणखसूचिः
वचनैः सुबन्तैः सह समस्यन्ते तत्पुरुषश्च समासो भवति वैयाकरणखसूचिः पापादीनि विशेष्यस्य पूर्वनिपातार्थः स्यात् ऽतः मीमांसक दु
र्दुरूढः, नालिकः, कुत्सितानीति किं वैयाकरणश्चौरः नह्यत्र वैयाकरणत्वं कुत्स्यते कुत्सने
वैयाकरणखसूचिः, निःप्रतिभः, याज्ञिककितवः, अयाज्ययाजनो तृष्णापरः, मीमांसक दु
र्दुरूढः, नालिकः, कुत्सितानीति किं वैयाकरणश्चौरः ५४ पापाणके कुत्सितैः, पापाणके कुत्सितैरभिधायिनो सह
तिति किं कुत्सितो ब्राह्मणः, पापाणके कुत्सितैः पापाणके कुत्सितार्थे विशेषणसमासे पापाणकयोः पूर्वनिपातः
योः पूर्वेण समासे परनिपातः, पापनापितः, पूर्वनिपातार्थः

[?]तो कुत्सितवचनैः सह समस्यते तत्पुरुषश्च समासो भवति पापनापितः पापकुलालः
गणककुलालः ५२ उपमानानि सामान्यवचनैः उपमीयतेऽनेनेत्युपमानं उपमानवा
चीनि सुबन्तानि सामान्यवचनैः उपमीयतेऽनेनेत्युपमानं उपमानवाचीनि सुबन्ता
नि सामान्यवचनैः सुबन्तैः सह समस्यन्ते तत्पुरुषश्च समासो भवति उपमानोपमेययोः
साधारणो धर्मः सामान्यं तद्विशिष्टोपमेयवचनैरयं समासः शस्त्रीव श्यामा शस्त्रीश्या
मा देवदत्ता कुमुदश्येनी हंसगद्गदा न्यग्रोधपरिमण्डला उपमानानीति किं देवदत्ता श्या
मा सामान्यवचनैरिति किं फाला इव तण्डुलाः पर्वता इव बलाहकाः ५३ उपमितं व्या
घ्रादिभिः सामान्याप्रयोगे उपमेयमुपमितं तद्वाचि सुबन्तं व्याघ्रादिभिः सामर्थ्यादुप
मानवचनैः सह समस्यते तत्पुरुषश्च समासो भवति न चेत्सामान्यवाची शब्दः प्रयुज्य
ते विशेषणविशेष्ययोरिति परनिपाते प्राप्ते विशेष्यस्य पूर्वनिपातार्थ आरम्भः पुरुषो
व्याघ्र इव पुरुषव्याघ्रः पुरुषसिंहः सामान्याप्रयोग इति किं पुरुषोऽयं व्याघ्र इव शूरः व्या
घ्रसिंह ऋक्ष ऋषभ चन्दन वृक्ष वृष वराह हस्तिन कुञ्जर रुरु पृषत पुण्डरीक कलोवि
कआकृतिगणश्चायं तेनेदमपि भवति मुखपद्मं मुखकमलं करकिसलयं पार्थिवचं
द्र इत्येवमादि ५४ विशेषणं विशेष्येण बहुलं भेदकं विशेषणं तद्वाचि सुबन्तं विशेष्य
वाचिना समानाधिकरणेन सुबन्तेन सह बहुलं समस्यते तत्पुरुष
श्च समासो भवति नीलोत्पलं रक्तोत्पलं बहुलवचनं व्यभिचारार्थं क्वचिन्नित्यसमास एव
कृष्णसर्पो लोहितशालिः क्वचिन्न भवत्येव रामो जामदग्न्यः व्यासः पाराशर्यः अर्जुनः का
र्तवीर्यः क्वचिद्विकल्पः नीलमुत्पलं नीलोत्पलं विशेषणमिति किं तक्षकः सर्पः विशेष्ये
णेति किं लोहिततक्षकः ५५ पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च पूर्व
ऽपरप्रथमचरमजघन्यसमानमध्यमध्यमवीर इत्येते सुबन्ताः समानाधिकरणेन सुबन्ते
न सह समस्यन्ते तत्पुरुषश्च समासो भवति पूर्वपुरुषः अपरपुरुषः प्रथमपुरुषः चरम
पुरुषः जघन्यपुरुषः समानपुरुषः मध्यपुरुषः अपमपुरुषः प्रथमपुरुषः चरमपु

रुषः जघन्यपुरुषः समानपुरुषः मध्यपुरुषः मध्यपुरुषः मध्यमपुरुषः वीरपुरुषः
पूर्वस्यैवायं प्रपंचो; ५६ श्रेण्यादयः कृतादिभिः; श्रेण्यादयः सुबंताः कृतादिभिः सा
मानाधिकरणैः सह समस्यन्ते तत्पुरुषश्च समासो भवति श्रेण्यादिषु च्व्यर्थवचनं अश्रे
का णयः श्रेणयः कृताः; श्रेणीकृताः; एककृताः; श्रेण्यादयः पठ्यन्ते कृतादिराकृतिगणः; च्व्यन्तानां
शि कुगतिप्रादयः इत्यनेन नित्यसमासः; श्रेणीकृताः श्रेणि एक पूग कुन्दम राशि विशिख नि
का चय निधन इन्द्र देव मुण्ड भूत श्रवण वदान्य अध्यापक ब्राह्मण क्षत्रिय पटु पण्डित कुश
ल चपल निपुण कृपण श्रेण्यादि कृत मत मित भूत उक्त समाज्ञात समाम्नात
८५ त संभावित अवधारित निराकृत अवकल्पित; उपकृत कृतादिभिः समाख्या
नानञ् नञेव विशेषो यस्य सर्वमन्यत्तु क्तादिकं तुल्यं; ५७ क्तेन नञ्विशिष्टे
विशिष्टेन क्तान्तेन समानाधिकरणेन सह समस्यते नञ्विशिष्टेन नञ्
भवति कृतं च तदकृतं च कृताकृतं भुक्ताभुक्तं पीतापीतं उदितानुदितं तत्पुरुषश्च समासो
नैवम्भेदको मन्तव्यः; न तिङन्तेन जीवति किं खादति किं पिबति नवजेते नुडिटौ नञ् को त्यानु
ख्यानं कृतापकृतं भुक्तविभुक्तं पीतविपीतं गतप्रत्यागतं यातानुयातं कृतापकृतादीनामुपसं
पुटापुटिका फलाफलिका मानोन्मानिका समानाधिकरणाधिकारे शाकपार्थिवादी
नामुपसंख्यानमुत्तरपदलोपश्च शाकप्रधानः पार्थिवः शाकपार्थिवः कुतपसौश्रुतः अजा
तौल्वलिः; ५८ सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः; सत् महत् परम उत्तम उत्कृ
ष्ट इत्येते पूज्यमानैः सह समस्यन्ते तत्पुरुषश्च समासो भवति पूज्यमानैरिति उत्तम उत्कृ
पूजावचनाः सदादयो विज्ञायन्ते सत्पुरुषः महापुरुषः परमपुरुषः उत्तमपुरुषः उत्कृष्ट
पुरुषः; पूज्यमानैरिति किं उत्कृष्टो गौः कर्दमात्; ५९ वृन्दारकनागकुञ्जरैः पूज्यमानं; वृन्दा
रकनागकुंजर इत्येते सह पूज्यमानवाचिभिः सुबन्तैः समस्यन्ते तत्पुरुषश्च समासो भवति पू
ज्यमानमिति विवचनात् वृन्दारकादयः पूज्यवचना गृह्यन्ते गोवृन्दारकः अश्ववृन्दारकः गो
नागः गोकुञ्जरः अश्वकुञ्जरः पूज्यमानमिति किं सुषीमो नागः; ६० कतरकतमौ जातिपरिप्र
श्ने कतरकतमौ जातिपरिप्रश्ने वर्तमानौ समानाधिकरणेन सह समस्येते तत्पुरुषश्च समा

सो भवति कतरः कठः कतरकठः कतमः कठः कतमकठः कतमः कालापः कतमकालापः ननु च
कतमशब्दः स्वाभाव्यात् जातिपरिप्रश्न एव व्युत्पादितः कतरशब्दो विसाहचर्यात् तदर्थं वृत्तिरे
व ग्रहीष्यते किं जातिपरिप्रश्नग्रहणेन एतत् देवदत्तः ६२ किं क्षेपे किमित्येतत् क्षेपे गम्यमा
ने सुपा सह समस्यते तत्पुरुषश्च समासो भवति किं राजा यो न रक्षति किं सखा यो द्रुह्य
ति किं गौर्यो न वहति किम् क्षेपे इति समासो न भवति क्षेप इति किं को राजा पाटलिपु
त्रे ६३ पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्याप
कधूर्तैर्जातिः उभयव्यञ्जना पोटेत्यभिधीयते गृष्टिरेकवारप्रसूता धेनुः प्रत्यग्रप्रसवा व
शा वन्ध्या वेहत् गर्भघातिनी बष्कयणी तरुणवत्सा पोटादिभिः सह जातिवाचि सुबन्तं समस्य
ते तत्पुरुषश्च समासो भवति इभपोटा इभयुवतिः अग्निस्तोकः उदश्वित्कतिपयं गोगृ
ष्टिः गोधेनुः गोवेहत् गोवष्कयणी कठप्रवक्ता कठश्रोत्रियः कठाध्यापकः कठधूर्तः जाति
रिति किं देवदत्तः प्रवक्ता धूर्तग्रहणमकुत्सनार्थं ६४ प्रशंसावचनैश्च जातिरिति वर्त्तते जा
तिवाचि सुबन्तं प्रशंसावचनैः सह समस्यते तत्पुरुषश्च समासो भवति रूढिशब्दाः प्रशंसा
वचना गृह्यन्ते मतल्लिकादयः तेषां विशेष्यलिङ्गत्वेन अन्यलिङ्गेऽपि जातिशब्दे स्वलिङ्गोपा
दाना एव समानाधिकरणा भवन्ति गोप्रकाण्डं गोमतल्लिका अश्वमतल्लिका गोमचर्चिका ग
ुव मचर्चिका जातिरिति किं कुमारी मतल्लिका ६५ युवा खलतिपलितवलिनजरतीभिः यु
वन्शब्दः समानाधिकरणैः खलत्यादिभिः सह समस्यते तत्पुरुषश्च समासो भवति जरतीभिरि
त्यादिभिः समानाधिकरणे जातिचेदिकं लिङ्गविशिष्टस्यापि ग्रहणं भवतीति ज्ञापनार्थं युव
तिः स्त्रीलिङ्गनिर्देशः युवा खलतिः युवखलतिः युवतिः खलती युवखलती युवा पलितः युवपलितः युवतिः पलिता यु
वपलिता युवा वलिनः युववलिनः युवतिर्वलिना युववलिना युवा जरन् युवजरन् युवति
र्जरती युवजरती ६६ कृत्यतुल्याख्या अजात्या कृत्यप्रत्ययान्ताः तुल्यपर्यायाश्च सुबन्ता अजाति
वचनेन सह समस्यन्ते तत्पुरुषश्च समासो भवति भोज्योष्णं भोज्यलवणं पानीयशीतं तुल्यश्वे
तः तुल्यमहान् सदृशश्वेतः सदृशमहान् अजात्येति किं भोज्य ओदनः ६७ वर्णो
वर्णेन वर्णवाचि सुबन्तं वर्णवाचिना सुबन्तेन सह समस्यते तत्पुरुषश्च स

सो भवति कृष्णसारंगः लोहितसारंगः कृष्णशवलः लोहितशवलः अवदातशोणः कृ
ष्णसारंगः समुदायेवर्त्तमानः समानाधिकरणो भवति ६७ कुमारः श्रमणादिभिः कुमारश्र
मणा श्रमणादिभिः सह समस्यते तत्पुरुषश्च समासो भवति योत्र स्त्रीलिंगाः पठ्यंते श्रमणा
प्रव्रजिता कुलटेत्येवमादयस्तैः सह स्त्रीलिंग एव कुमारशब्दः समस्यते येतु पुंल्लिंगा
अध्यापकोभिरूपकः पंडित इति तैरुभयथापि प्राप्नोति यदि कश्रमणोलिंगविशिष्टस्यापि ग्रह
णं भवति कुमारीश्रमणा कुमारश्रमणा कुमारप्रव्रजिता श्रमणा प्रव्रजिता कुलटा गर्भि
का णी तापसी दासी बंधकी अध्यापकः अभिरूपकः पंडितः पटुः मृदुः कुशल चपल निपुण ६७ च
४६ तुष्पादो गर्भिण्या चतुष्पाद्वाचिनः सुबंता गर्भिणीशब्देन सह समस्यते तत्पुरुषश्च समासो भ
वति गोगर्भिणी अजगर्भिणी चतुः जातिरिति वक्तव्यं इह मा भूत् कालाक्षी गर्भिणी स्वस्ति
५ मती गर्भिणी चतुःपाद इति किं ब्राह्मणी गर्भिणी ६७ मयूरव्यंसकादयश्च समुदाया एव निपा
त्यंते मयूरव्यंसकादयः शब्दाः तत्पुरुषसंज्ञो भवति चकारो वधारणार्थः परमंमयूरव्यंस
क इति समासांतरं न भवति मयूरव्यंसकः छात्रव्यंसकः कांबोजमुंडः यवनमुंडः छंदसि हस्ते
गृह्य पादेगृह्य पादेगृह्य लांगूलेगृह्य पुनर्दाय एहीडं वर्त्तते यदा चेयं एहीडं एहियवं वर्त्तते
एहिवाणिजा क्रिया अपेहिवाणिजा प्रेहिवाणिजा एहिस्वागता अपेहिस्वागता एहिद्विती
या अपेहिद्वितीया प्रेहिद्वितीया एहिकटा अपेहिकटा प्रोहिकर्दमा अपेहिकर्दमा प्रोहि
कर्दमा प्रोहकर्दमा उद्धरचूडा आहरवनिता आहर उच्चा उच्चं उच्चनीचं आचोपचं आचप
राचं निश्चप्रचं अकिंचनं सकिंचनं स्नात्वाकालकः पीत्वास्थिरकः भुक्त्वासुहितः प्रोष्यपा
पीयान् उत्पत्यपाकिता निपत्यरोहिणी निषण्णश्यामा अपेहिप्राणा साइह पंचमी इह द्विती
या जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्त्तारं चाभिदधाति जहिजोडः उज्जहिजोडः उज्जहिस्तंबः
आख्यातमाख्यातेन क्रियासातत्ये अश्नीतपिबता पचतभृज्जता खादतमोदता खादतवमता आ
हरनिवपा आवपनिष्किरा उत्पचविपचा भिंधिलवणा छिंधिविचक्षणा पचप्रकूटा अविहित
लक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः ५८ इति काशिकायां वृत्तौ द्वितीयाध्यायस्य प्रथ
मः पादः ॥ पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे एकदेशोऽस्यास्तीत्येकदेशी अव

यश्चैतद्वाचिना सुबन्तेन सह पूर्वापराधरोत्तरशब्दाः ; सामर्थ्यादेकदेशवचनाः ; सम
स्यन्ते तत्पुरुषश्च समासो भवति एकाधिकरणग्रहणं एकदेशिनो विशेषणं एकं चेद
धिकरणं एकद्रव्यमेकदेशि भवति षष्ठीसमासापवादोयं योगः ; पूर्वं कायस्य पूर्वका
यः ; अपरकायः ; उत्तरकायः ; एकदेशिनेति किं पूर्वं नाभेः कायस्य एकाधिकरणे इति किं
पूर्वं छात्राणामामन्त्रयस्व कथं मध्याह्नः ; सायाह्न इति संख्याविसायपूर्वस्याह्नस्येति ज्ञा
पनात् सर्वेण एकदेशिनास्ति समासो भवति अर्द्धं नपुंसकं ; एकदेशिनैकाधिकर
णे इति वर्तते समप्रविभागे अर्द्धशब्दो नपुंसकमाविष्टलिङ्गः तस्येदं ग्रहणं अर्द्धमि
त्येतन्नपुंसकमेकदेशिनैकाधिकरणेन सह समस्यते तत्पुरुषश्च समासो भवति
षष्ठीसमासापवादोयं योगः ; अर्द्धं पिप्पल्याः ; अर्द्धपिप्पली ; अर्द्धं कोशातक्याः ; अर्द्धको
शातकी नपुंसकमिति किं ग्रामार्द्धः नगरार्द्धः ; एकदेशिनेत्येव अर्द्धं पशोर्देवदत्तस्य देव
दत्तेन समासो न भवति एकाधिकरण इत्येव अर्द्धं पिप्पलीनां २ द्वितीयतृतीयचतुर्थ
तुर्याण्यन्यतरस्यां एकदेशिनैकाधिकरणे इति वर्तते द्वितीयादीनि शब्दरूपाणि एकदेश
ष्ठीसमासापवादोयं योगः ; अन्यतरस्यांग्रहणान्नु सोपि भवति पूरणेति प्रतिषेधश्चा
त एवान्यतरस्यांग्रहणमपर्याप्तन्यपूर्वे तैते षष्ठीसमासापवादोयं योगः ; अन्यतरस्यां
ग्रहणान्नु सोपि भवति पूरणेति प्रतिषेधश्चात एवान्यतरस्यांग्रहणात् सामर्थ्यान्न पूर्वनि
ते । द्वितीयादीनि शब्दरूपाणि एकदेशिनैकाधिकरणेन सहान्यतरस्यां समस्यन्ते त
त्पुरुषश्च समासो भवति द्वितीयं भिक्षायाः ; द्वितीयभिक्षा भिक्षाद्वितीयं वा तृतीयं भिक्षा
याः ; तृतीयभिक्षा भिक्षातृतीयं वा चतुर्थं भिक्षायाः ; चतुर्थभिक्षा भिक्षाचतुर्थं वा तुर्यं
भिक्षायाः ; तुर्यभिक्षा भिक्षातुर्यं वा एकदेशिनेत्येव द्वितीयं भिक्षाया भिक्षुकस्य एकाधि
करण इत्येव च द्वितीयं भिक्षाणां ३ प्राप्तापन्ने च द्वितीयया एकदेशिनैकाधिकरण इति नि
वृत्तं द्वितीयासमासे प्राप्तापेवचनमिदं विधानसामर्थ्यात् सोपि भवति प्राप्तापन्ने इत्ये

ते। द्वितीयान्ते समस्यते तत्पुरुषश्च समासो भवति प्राप्तो जीविकां प्राप्तजीविकः।
जीविकाप्राप्त इति वा आपन्नो जीविकाम् आपन्नजीविकः। जीविकापन्न इति वा।
का कालाः परिमाणिना परिमाणमस्यास्तीति परिमाणी तद्वाचिना सुबन्तेन सह सा
द्विमप्यन्तं परिमाणवचना। कालद्विकाः समस्यन्ते तत्पुरुषश्च समासो भवति षष्ठीस
मासोऽविषये योगारंभः। मासो जातस्य मासजातः। संवत्सरजातः। द्व्यहजातः। त्र्यहजातः।
५ नञ्। नञ् सुबन्तं सुबन्तेन सह समस्यते तत्पुरुषश्च समासो भवति
४६ न ब्राह्मणः अब्राह्मणः। अवृषलः। ६ ईषदकृता। ईषदित्ययं तु कृदन्तेन सुपा
सह समस्यते तत्पुरुषश्च समासो भवति ईषद्गुणवचनेनेति वक्तव्यं ईषत्पिंगलः।
ईषद्विकारः। ईषत्कडारः। ईषदुन्नतः। ईषत्पीतः ईषद्रक्तः गुणवचनेनेति किंके ईष
द्गार्ग्यो न भवति राजपुरुषः ब्राह्मणकम्बलः पशुपादः कृद्योगा च षष्ठी समस्यते इति व
क्तव्य इध्मव्रश्चनः पलाशशातनः। किमर्थमिदमुच्यते प्रतिपदविधाना च षष्ठी न
समस्यते इति वक्ष्यति तस्याः प्रपुरस्तादपकर्षः। ७ याजकादिभिश्च पूर्वेण समासः सि
द्ध एव तस्य केत्तरिवेति प्रतिषेधप्राप्तो वचनमिदं प्रतिप्रसवार्थं याजकादिभिः। सह ष
ष्ठी समस्यते तत्पुरुषश्च समासो भवति ब्राह्मणयाजकः। क्षत्रिययाजकः। याजक पूजक
परिचारक परिवेषक स्नापक अध्यापक उत्सादक उद्वर्तक होतृ पोतृ भर्तृ रथगण
कः पत्तिगणक तन्नेभिश्च गुणैः षष्ठी समस्यते इति वक्तव्यं चन्दनगन्धः। कपित्थरसः। गु
णान्तरेणापि लोपश्चेति वक्तव्यं सर्वेषां श्वेततरः। सर्वश्वेतः। एवं सर्वेषां महत्तरः सर्व
महान्। निर्धारणे प्रतिषेधप्राप्तो वचनमिदं सर्वश्वेता गौः। एतन्निर्धारणपूर्वेण समा
से प्राप्ते प्रतिषेधार्थमुच्यते निर्धारणषष्ठी सा न समस्यते जातिगुणक्रियाभिः। मनु
पो यादेकदेशस्य पृथक्करणानि निर्धारणं जातियो मनुष्याणां क्षत्रियः शूरतमः। कृष्णा गवां संप

पञ्चनीरन्नमाः श्रावकनाद्या गानां कृष्णा युतमः प्रतिपदविधाना च षष्ठी न समस्यते इ
ति वक्तव्यम् सर्पिषो ज्ञानं मधुनो ज्ञानं ज्ञोऽविदर्थस्य करणे इति षष्ठी १० पूरणगुणसु
हितार्थसदव्ययतव्यसमानाधिकरणेन पूरणगुणसुहितार्थसदव्ययतव्यस
मानाधिकरणैः इत्येतैः सह षष्ठी न समस्यते अर्थग्रहणं प्रत्येकमभिसंबध्यते तेन स्व
रूपविधिर्न भवति पूरण छात्राणां पञ्चमः छात्राणां दशमः गुण बलाकायाः शौक्ल्यं का
कस्य कार्ष्ण्यं सुहितार्थाः फलानां सुहितः फलानां तृप्तः सत् ब्राह्मणस्य कुर्व
न् ब्राह्मणस्य कुर्वाणः अव्यय ब्राह्मणस्य कृत्वा ब्राह्मणस्य हृत्वा तव्य ब्राह्मणस्य कर्त
व्यं तव्यता सानुबन्धकेन समासो भवत्येव ब्राह्मणकर्तव्यं समानाधिकरण शुकस्य मा
राविपस्य राज्ञः पाटलिपुत्रस्य पाणिनेः सूत्रकारस्य किं च स्यात् पूर्वनिपातनियमात् तदानि
योगतो विशेषणस्यैव ११ क्तेन च पूजायाम् मतिबुद्धिपूजार्थेभ्यश्चेति वर्तमाने विहितस्य प्र
रणं पूजाग्रहणमुपलक्षणार्थं क्तो यः पूजायां विहितः तेन षष्ठी न समस्यते राज्ञां मतः
राज्ञां बुद्धः राज्ञां पूजितः पूजायामिति किं छात्रस्य हसितं छात्रस्य हसितं १२ अधिकरणवाचि
ना च अधिकरणवाचिना च क्तेन षष्ठी न समस्यते इदमेषामासितं इदमेषां यातं इदमेषां भुक्तं १३ कर्म
णि च कर्मणि च या षष्ठी सा न समस्यते उ
भयप्राप्तौ कर्मणीति या षष्ठी विहिता तस्या ग्रहणं आश्चर्यो गवां दोहोऽगोपालेन रोच
ते मे ओदनस्य भोजनं देवदत्तेन साधु खलु पयसः पानं देवदत्तेन विचित्रा हि सूत्रस्य कृ
तिः पाणिनिना १४ तृजकाभ्यां कर्तरि कर्तृग्रहणं षष्ठीविशेषणं कर्तरि या षष्ठी सा तृचा
अकेन च सह न समस्यते भवतः शायिका भवतः आसिका भवतो गामिका तृचकर्त्रे चवि

धीयते तत्र योगे कर्त्तरि षष्ठी नास्ति तस्मात्तृच्च ग्रहणम् तृजकार्थं कर्त्तरीति किं इक्षु
भक्षिकां मे धारयसि ॥ कर्त्तरि च ॥ कर्त्तरि यौ तृजकौ ताभ्यां सह षष्ठी न समस्यते समर्था
का दकस्य विभूषणार्थं कर्त्तृग्रहणम् इतरत्राव्यभिचारात् अकस्य षष्ठी घुञ्जमेता च तृस्य भर्त्ता
ष्ठि ननु मे तृजकौ याजकादिषु पठ्यते संबंधिशब्दस्य पतिपर्यायस्य तत्र ग्रहणम् अके
का नुच्चत्वापि ओदनस्य भोजकः सक्तूनां पायकः ॥ नित्यं क्रीडाजीविकयोः ॥ नेति निवृत्तं मि
त्यं समासो विधीयते क्रीडायां जीविकायां च नित्यं षष्ठी समस्यते तत्पुरुषश्च समासो भ
१ एवति इच्च क्रीडाजीविकयोः नोलीत्यकः एवोपादीयते उद्दालकपुष्पभंजिका वारणपुष्प
प्रचायिका जीविकायां दंतलेखकः चाखलकः ॥ क्रीडाजीविकयोरिति किं ओदनस्य भोज
कः ॥ १८ कुगतिप्रादयः ॥ नित्यमिति वर्त्तते कुशब्दो व्ययं गृह्यते गत्यादिसाहचर्यान्न कुत्स
वचनः ॥ कुगतिप्रादयः समर्थेन शब्दान्तरेण सह नित्यं समस्यते तत्पुरुषश्च समासो भ
वति कुत्सितः पापार्थे कुपुरुषः ॥ गतिः ॥ ऊरीकृत्य उररीकृत्य उररीकृतं यदूरीकरोति प्रादयः
दुर्निंदायां दुःपुरुषः स्वतीपूजायां सुपुरुषः अतिपुरुषः आङीषदर्थे आपिंगलः प्रा
यिकं चैतत् उपाधिवचनेन मन्यत्रापि हि समासो दृश्यते कोष्णकदुष्ण दुः कृतं सुप्रात
प्रातिसुतं आवक्षमिति प्रादयो गताद्यर्थे प्रथमया प्रगत आचार्यः प्राचार्यः प्रांतेवासी
अत्यादयः क्रांताद्यर्थे द्वितीयया अतिक्रांतः खट्वां अतिखट्वः अतिमालः अवादयः क्रुष्ट
ाद्यर्थे तृतीयया अवक्रुष्टः कोकिलया अवकोकिलः वसंतः पर्यादयो ग्लानाद्यर्थे चतुर्थ्या
परिग्लानो ध्ययनाय पर्यध्ययनः अलं कुमार्यै अलंकुमारिः निरादयः क्रांताद्यर्थे पंच
म्या निः क्रांतः कौशांब्या निःकौशांबिः निर्वाराणसिः इवेन विभक्त्यलोपः पूर्वपदप्र
कृतिस्वरत्वं च वाससी इव प्रादिप्रसंगे कर्मप्रवचनीयानां प्रतिषेधो वक्त

ष्ठा । वर्त्तं प्रतिविधेयोऽनेनेति विद्यात् साधुर्देवदत्तो मातरं स्मरति ॥ १८ उपपदमतिङ् ॥ नित्यमिति वर्त्त-
ते । उपपदमतिङन्तं समर्थेन शब्दान्तरेण सह नित्यं समस्यते तत्पुरुषश्च समासो भवति कुं-
भकारो नगरकारः अतिङिति किं एधानाहारको व्रजति ननु च सुप् सुपेति वर्त्तते न चात्र
लिङः प्रसङ्गः एतज्ज्ञापयति एतद्योगयोगयोः न सुप् सुपेति संबध्यते इति तेन गतिकारकोप-
पदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः [illegible] उपपदं भवति अपूर्वको
तीधनुर्ज्ञीतो ॥ १९ अमैवाव्ययेन पूर्वेणैव समासे सिद्धे नियमार्थं वचनं अव्ययेनोपपदस्य
यः समासः सोऽमैव नान्येन स्वादुङ्कारं भुङ्क्ते संपन्नकारं भुङ्क्ते लवणाकारं भुङ्क्ते अमैवेति
किं कालसमयवेलासु तुमुन् कालो भोक्तुं समयो भोक्तुं एवकारकरणं उपपदविशेषणा-
र्थं अमैव यत्तुल्यविधानं उपपदं तस्य समासो यथा स्यात् अमा चान्येन च यत्तुल्यविधानं
तस्य मा भूत् अग्रे भुक्त्वा अग्रे भोजं २० तृतीयाप्रभृतीन्यन्यतरस्याम् अमैवेत्यनुवर्त्तते उपपदं
तृतीयाप्रभृतीनि यान्युपपदानि तान्यमैवाव्ययेनान्यतरस्यां समस्यन्ते
तत्पुरुषश्च समासो भवति उभयत्र विभाषेयं यदमैव तुल्यविधानं तस्याप्राप्ते यथा अव्यये
यथा च पदं तृतीयाप्रभृतीति यान्यमा चान्येन च तुल्यविधानानि तस्य [illegible] उच्चैः कारं
[illegible] मित्रेणाख्यातेवानं [illegible] मूलकोपदंशं भुङ्क्ते २१ क्त्वा च अमैवेति पूर्वयोगे
नैवेत्येव पर्यायादिवचनेऽपि फलमेतदेव पर्याप्तोऽभोक्तुं प्रभुर्भोक्तुं [illegible] तृतीयाप्रभृतीनि उपपदानि
[illegible] तेनान्यत्र न प्राप्तो नीति वचनमारभ्यते क्त्वाप्रत्ययेन सह तृतीयाप्रभृतीनि
[illegible] अन्यतरस्यां समस्यन्ते तत्पुरुषश्च समासो भवति उच्चैः कृत्य उच्चैः कृत्वा [illegible] अव्ययेन अलं कृत्वा खलु कृत्वा २२
[illegible] इति क्त्वा प्रत्ययः समासप्रतिषेधे तृतीयाप्रभृतीनि [illegible] भवति [illegible] यत्र
[illegible] बहुव्रीहिः उपयुक्तो पदन्यः [illegible] समासो बहुव्रीहिसंज्ञो भवति [illegible] इति
[illegible] समासो नो [illegible] वक्ष्यति अनेकमन्यपदार्थे चित्रगुः शबलगुः [illegible] २३ अनेकमन्यपदार्थे [illegible]
किं [illegible] बहुव्रीहिप्रदेशाः न बहुव्रीहौ [illegible]

नेकं सुबन्तं अन्यपदस्यार्थे वर्त्तमानं समस्यते बहुव्रीहिश्च समासो भवति प्रथमार्थमे
कं वर्जयित्वा सर्वेषु विभक्त्यर्थेषु बहुव्रीहिर्भवति प्राप्तमुदकं यं ग्रामं प्राप्तोदको ग्रा
मः ऊढरथोऽनड्वान् उपहृतपशुः रुद्रः उद्धृतौदना स्थाली चित्रगुर्देवदत्तः वीरपुरु
का षको ग्रामः प्रथमार्थे तु न भवति वृष्टे देवे गतः अनेकग्रहणं किं बहूनामपि यथा स्यात्
क्रीमु सुसूक्ष्मजटकेशेन सुनताजिनवाससा समन्तशितिरन्ध्रेण द्वयोर्वृत्तौ न सिध्यति बहु
काव्रीहिः समानाधिकरणानामिति वक्तव्यं व्याधिकरणानां मा भूत् पञ्चभिर्भुक्तमस्य अव्यया
नां च उच्चैर्मुखः नीचैर्मुखः सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च कण्ठेस्थितः का
५९ लो यस्य कण्ठेकालः उरसिलोमा उष्ट्रस्य मुखमिव मुखमस्य उष्ट्रमुखः खरमुखः समुदाय
विकारषष्ठ्याश्च बहुव्रीहिरुत्तरपदलोपश्चेति वक्तव्यं केशानां समाहारः चूडा अस्य केशचू
डः सुवर्णस्य विकारो अलंकारो अस्य सुवर्णालंकारः प्रपतितपर्णः प्रपर्णः नञोऽस्त्यर्थानां बहु
व्रीहिर्वा चोत्तरपदलोपश्च अविद्यमानः पुत्रो अस्य अविद्यमानपुत्रः अपुत्रः अवि द्य
मानभार्यो अभार्यः सुबधिकारे अस्तिक्षीरादिवचनं अस्तिक्षीरा ब्राह्मणी अस्त्यादयो निपाताः
२४ संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये संख्येयेयासे व्याववर्त्तते तया सह अव्ययादयः
सन्नाधिकसंख्याः समस्यन्ते बहुव्रीहिः समासो भवति अव्यय उपदशाः उपविंशाः उपत्रिं
शाः आसन्नदशाः आसन्नविंशाः आसन्नत्रिंशाः अदूरदशाः अदूरविंशाः अदूर
त्रिंशाः अधिकदशाः अधिकविंशाः अधिकत्रिंशाः संख्या द्वित्राः त्रिचतुराः त्रिदशाः संख्ये
ये इति किं पञ्चब्राह्मणाः अव्ययासन्नादूराधिक संख्या इति किं ब्राह्मणाः पञ्च संख्येय इति किं
अधिका विंशतिर्गवां २५ दिङ्नामान्यन्तराले दिङ्नामानि सुबन्तानि अन्तराले वाच्ये स
मस्यन्ते बहुव्रीहिश्च समासो भवति दक्षिणस्याश्च पूर्वस्याश्च दिशो यदन्तरालं दक्षिणपू
र्वा दिक् पूर्वोत्तरा पश्चिमोत्तरा पश्चिमदक्षिणा सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भाव
नामग्रहणं रूढ्यर्थं इह मा भूत् ऐन्द्र्याश्च कौबेर्याश्च दिशो यदन्तरालं इति २६ तत्रेतेन्द

सेति सरूपेषु देते नेतिच रतीयांते इदमित्यो। तास्मिन्नर्थे समस्यन्ते बहुव्रीहिश्च समा
सो भवति इति कारणमन्तश्चोदि वक्ता लौकिकमर्थमनुसारयति। ततो ग्रहणमेव
स्मा कर्मव्यतिहारे युद्धं च समासार्थ इति सर्वत्र मा तत्तेति तिदिग्ग्रहणं युद्धं चेन भवति केशोषु
ति यत्नेनेति त्रिदिग्ग्रहणं युद्धाच भवति यदि दामिति कचाकचि दण्डादण्डि प्रहृत्य प्रवृत्ते दण्ड
चकेषु च गृहीत्वा युद्धं वृत्तं केशाकेशि कचाकचि दण्डादण्डि ससासान्तं सुचावाय अन्ये त्वामावि
दण्डि मुष्टामुष्टि इच कर्मव्यतिहारे इति इचु सः समासान्तं मुष्टामुष्टि दण्डादण्डि प्रवृत्तं युद्धं
इत्युपते इति पूर्वपदस्य दीर्घत्वं सरूपग्रहणं किं हलेश्च मुसले च प्रवृत्य पूर्वतेषु
दण्डे तेने सहेति तुल्ययोगे नेत्यनेन सह तुल्ययोगे वचने मानं तेनेति तृतीया
यो तेन सह समस्यन्ते बहुव्रीहिः समासो भवति सपुत्रेण गतः सच्छात्रः सक
सेकर्म तुल्ययोग इति किं सहैव दशभिः पुत्रैः भारं वहति गर्दभी विद्यमाने इत्यन्ये वहुत्य
त्रैर्भारं वहति तुल्ययोगेऽपि किं सहकर्मकः सलोमकः सपक्ष इति नच तेन तुल्ययोगो गम्यते किं
मस्ति विद्यमानता प्रायिकं तुल्ययोग इति विशेषणं अन्यत्रापि समासो दृश्यते यथा
र्थः अनेकमिति वर्त्तते अनेकं सुबन्तं चार्थे वर्त्तमानं समस्यते द्वन्द्वसंज्ञकश्च स
मासो भवति समुच्चयो न्वाचय इतरेतरयोगः समाहार इति चार्थाः। तत्र समुच्चयान्वाच
ययोः असामर्थ्यान्नास्ति समासः। इतरेतरयोगे समाहारे च विधीयते धवखदिरौ अन्यत्रैव
श्च प्लक्षन्यग्रोधौ धवश्च खदिरश्च पलाशश्च धवखदिरपलाशाः। वाक् च त्वक् च वाक्त्वच
वाग्दृषदं छत्रोपानहम्। धवे चेत्ये च माधवः। अर्थस्य समासे पूर्वं समासान्त इति वर्त्तते अप
सर्जनं संज्ञकं समासे पूर्वं वक्तव्यं पूर्ववचनं परप्रयोगनिवृत्त्यर्थं नियमो हि स्याः
तृ विनीयाकष्टे श्रितो। तृतीया पूर्वकलापेऽ च तद्यो यूपदारु वा दाह पंचमी चकेमंय

काशिका

श्रीराजपुरुषः। सप्तमी शौण्डैः। सू० राजदन्तादिषु परं। पूर्वनिपाते प्राप्ते परप्रयोगा-
र्थं वचनं। राजदन्तादिषु परमुपसर्जनं प्रयोक्तव्यं। न केवलं उपसर्जनस्यान्यस्यापि यथा-
देशलक्षणं विहितपूर्वनिपातस्य परनिपातो विधीयते। दन्तानां राजा राजदन्तः। वन-
स्याग्रे अग्रेवणं। निपातनादलुक्। राजदन्तः। अग्रेवणं। लिप्तवासितं। नग्नमुषितं। सि-
क्तसंमृष्टं। मृष्टलुञ्चितं। अवक्लिन्नपक्वं। अर्पितोप्तं। उप्तगाढं। पूर्वकालस्य परनिपा-
५० तः। उलूखलमुसलं। तण्डुलकिण्वं। दृषदुपलं। आरग्वायनबन्धकी। चित्ररथबाह्लीकं। अ-
वन्त्यश्मकं। शूद्रार्यं। स्नातकराजानौ। विष्वक्सेनार्जुनौ। अक्षिभ्रुवं। दारगवं। शब्दार्थौ। ध-
र्मार्थौ। अनियमश्चात्रेष्यते। अर्थशब्दौ। अर्थधर्मौ। अर्थकामौ। [illegible]
[illegible] इति। वैकारिमतं। गजवाजं। गोपालधानीपूलासं। ककरण्डं। स्थूलपूलासं।
उशीरबीजं। सिञ्जास्थं। चित्रास्वाती। भार्यापती। जायापती। जम्पती। दम्पती। जायाया जं-
भावो दंभावश्च निपात्यते। पुत्रपती। पुत्रपशू। केशश्मश्रू। शिरोबीजं। सर्पिर्मधुनी। म-
धुसर्पिषी। आद्यन्तौ। अन्तादी। गुणवृद्धी। वृद्धिगुणौ। सू० द्वन्द्वे घि। पूर्वमित्यनुवर्तते। द्वन्द्वस-
मासे घिसंज्ञं पूर्वं प्रयोक्तव्यं। पटुगुप्तौ। द्वन्द्वे समासे सर्वोपसर्जनत्वात्पर्यायेण प्राप्ते
वचनं। अनेकप्राप्तावेकस्य नियमः। शेषेष्वनियमः। पटुमृदुशुक्लाः। पटुशुक्लमृदवः।
द्वन्द्व इति किं। विस्पष्टपटुः। सू० अजाद्यदन्तं। द्वन्द्व इति वर्तते। अजाद्यदन्तं द्वन्द्वे
समासे पूर्वं प्रयोक्तव्यं। उष्ट्रखरं। उष्ट्रशशकं। बहुष्वनियमः। अश्वरथेन्द्राः। इन्द्ररथाश्वाः। घ्यन्ता-
जाद्यदन्तं विप्रतिषेधेन। इन्द्राग्नी। इन्द्रवायू। तपरकरणं किं। अश्वावृषौ। वृषाश्वौ। [illegible]
[illegible] अल्पाच्तरं। अल्पाच्तरं द्वन्द्वे समासे पूर्वं प्रयोक्तव्यं। प्लक्षश्च न्यग्रोधश्च प्लक्ष-
न्यग्रोधौ। धवखदिरपलाशाः। बहुष्वनियमः। शङ्खदुन्दुभिवीणाः। वीणाशङ्खदुन्दुभयः। ऋतुनक्ष-
त्राणां समाक्षराणामानुपूर्व्येण पूर्वनिपातो वक्तव्यः। हेमन्तशिशिरवसन्ताः। चित्रा-

स्वाती कृत्तिकारोहिण्यौ संमार्गान्तरात्मणां पूर्वनिपातो वक्तव्यः हेमंत समानाक्षराणामिति
किं ग्रीष्मवसंतौ लघ्वक्षरं पूर्वं निपतति कुशकाशं शरच्छ्रीजं अभ्यर्हितं च मातापित
रौ श्रद्धामेधे दीक्षातपसी वर्णानामानुपूर्व्येण ब्राह्मणक्षत्रियविट्शूद्राः सम्मानाद
नाणामिति पत्रनाम्नीति भ्रातुश्च ज्यायसः युधिष्ठिरार्जुनौ संख्याया अल्पीयस्याः द्वि
त्राः त्रिचतुराः नवतिशतं सप्तमीविशेषणे बहुव्रीहौ सर्वोपसर्जनत्वादनियते
ऽनियमे प्राप्ते नियमार्थं वचनं सप्तम्यंतं विशेषणं च बहुव्रीहौ समासे पूर्वं प्रयो
क्तव्यं कंठेकालः उरसिलोमा विशेषणं चित्रगुः शबलगुः सर्वनामसंख्ययोरुपसं
ख्यानं सर्वश्वेतः सर्वशुक्लः सर्वकालः द्विशुक्लः द्विकृष्णः अन्यतरो एव मिथः संख्याभोऽल्पी
यस्याः पूर्वनिपातः द्व्यन्याः त्र्यन्याः वा प्रियस्य गुडप्रियः प्रियगुडः
सप्तम्याः पूर्वनिपाते गड्वादिभ्यः परत्वं चेत् गडुकंठः गडुशिराः वा यो वहे गडुः प्राप्तस्य
वा बाधा व्याप्त्या यादृच्छिकनिष्ठा निष्ठान्तं बहुव्रीहौ पूर्वं प्रयोज्यं कृतकटः भिक्षितभिक्षः
अवमुक्तोपानत्कः आहूतस्व ब्राह्मणः ननु विशेषणमेवात्र निष्ठा नैष नियमो विशेष
णविशेष्यभावो स्व विवक्षानिबंधनत्वात् कृतकटश्च मनेनेति चापि ग्रहीतव्यं निष्ठायाः
पूर्वनिपाते जातिकालसुखादिभ्यः परत्वं चेत् सारंगदग्धी पलाण्डुभक्षिती मासजातः
सुखजातः सेवगन्तुजातः कष्टकृतः कटः अकोदनः प्राप्तस्य वा बाधा व्याप्त्या बहुव्रीहि
वाहिताग्न्यादिषु निष्ठेति पूर्वनिपाते प्राप्ते विकल्पोच्यते आहिताग्न्यादिषु निष्ठांतं वा पूर्वं प्रयोक्तव्यं आ
हिताग्निः अग्न्याहितः प्रहरणार्थेभ्यश्च परे निष्ठा सप्तम्यो भवत इति वक्तव्यं अस्युद्यतो दंडपाणिः कथं
उद्यतगदः उद्यतासिः प्राप्तस्य वा बाधा व्याप्त्यर्थो आहिताग्निः जातपुत्रः जातश्मश्रुः तैलपीतः घृतपी
तः ऊढभार्यः गतार्थः आकृतिगणोऽयं तेन गडुकंठप्रभृतयः द्वंद्वे इत्येव दृष्टव्याः नञ्तत्पुरुषात् कर्मधारय

गुणशुक्लानां विशेषणत्वात्पूर्वनिपाते प्राप्ते विकल्प उच्यते कडारादयः शब्दाः कर्म्मधारये
समासे वा पूर्वं प्रयोक्तव्याः कडारजैमिनिः जैमिनिकडारः कडार गडुल काण खञ्ज कुण्ठ
का खेलड खलति गौर वृद्ध भिक्षुक पिङ्गल तनु वटरः कर्म्मधारय इति किं कडारपुरुषो ग्रामः इ
शि ति काशिकायां वृत्तौ द्वितीयाध्यायस्य द्वितीयः पादः अनभिहिते अनभिहित इत्यधिकारो
को वेदितव्यः यदित ऊर्ध्वमनुक्रमिष्यामोऽनभिहित इत्येवं तद्वेदितव्यं अनभिहिते तूक्तेक
र्मादौ विभक्तिर्भवति केनानभिहिते तिङ्कृमिष्यामोऽनभिहित इत्येवं तद्वेदितव्यम् अ
नभिहिते तूक्ते कर्मादौ विभक्तिर्भवति केनानभिहिते तिङ्कृत्तद्धितसमासैः परिसंख्यान
५८ वक्ष्यति कर्मणि द्वितीया कटं करोति ग्रामं गच्छति अनभिहित इति किं तिङ् क्रियते कटः कृ
त कृतः कटः तद्धित शतेन क्रीतः शत्यः शातिकः समासः प्राप्तमुदकं यं ग्रामं प्राप्तोदको
ग्रामः परिसंख्यानं किं कटं करोति भीष्ममुदारं दर्शनीयं बहुषु बहुवचनं इत्येवमादिना सं
ख्या वाच्यत्वेन विभक्तीनामुपदिष्टा तत्र विशेषणानामपि द्वारं स्यात् अनभिहिते कर्मा
द्यश्च चेष्टा कर्त्रादिषु द्वितीयादयो वेदितव्या इति १ कर्मणि द्वितीया द्वितीयादयः शब्दाः पूर्व
वार्थे सुप्त्रिकेषु स्मर्यन्ते तैरेवात्र व्यवहारः कर्मणि कारके या संख्या तत्र द्वितीया विभ
क्तिर्भवति कटं करोति ग्रामं गच्छति उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु । द्वितीयाम्रेडितान्ते
षु ततोऽन्यत्रापि दृश्यते उभयतो ग्रामं सर्वतो ग्रामं धिक् देवदत्तं उपर्युपरि ग्रामं अधोऽधो ग्रामं
अध्यधि ग्रामं अभितः परितः समया निकषा हा प्रति योगेषु च दृश्यते अभितो ग्रामं परितो ग्रामं नि
कषा ग्रामं हा देवदत्तं बुभुक्षितं न प्रतिभाति किंचित् २ तृतीया च होश्छन्दसि कर्मणीति वर्त्तते द्विती
यायां प्राप्तायां तृतीया विधीयते चकाराद्द्वितीया च भवति छन्दसि विषये जुहोतेः कर्मणि कारके तृती
याविभक्तिर्भवति । द्वितीया च यवाग्वाग्निहोत्रं जुहोति यवागूमग्निहोत्रं जुहोति छन्दसीति किं
यवागूं जुहोति ३ अन्तरान्तरेणयुक्ते द्वितीया स्यात् अन्तरान्तरेण शब्दौ निपातौ साहच
र्यात्परिगृह्येते ताभ्यां योगे द्वितीया विभक्तिर्भवति षष्ठ्यपवादो योगः तेत्रान्तरा त्वां मध्ये मध्ये

प्रधानमाचष्टे अन्तरेण मावल्लुन्तत्र विना एँच अन्तरा त्वां च मां च कमण्डलुः; अन्तरेण त्वां
च मां च कमण्डलुः; अन्तरेण पुरुषकारं किंचिन्न लभ्यते युक्तो गुरुणा। किं अन्तरा तक्षशि
ला च पाटलिपुत्रं च सुघ्नस्य प्राकारः। ७ कालाध्वनोरत्यन्तसंयोगे ॥ कालशब्देभ्योध्वशब्देभ्य
श्च द्वितीया विभक्तिर्भवति अत्यन्तसंयोगे गम्यमाने क्रियागुणद्रव्यैः साकल्येन काला
ध्वनोः संबन्धोत्यन्तसंयोगः; मासमधीते संवत्सरमधीते मासं कल्याणी संवत्सरं कल्याणी
मासं गुडधानाः; संवत्सरं गुडधानाः; क्रोशमधीते योजनमधीते क्रोशं कुटिला नदी योज
नं कुटिला नदी क्रोशं पर्वतः; योजनं पर्वतः; अत्यन्तसंयोगस्येति किं मासस्य द्विरधीते
अपवर्गे; फलप्राप्तौ सत्यां क्रियापरिसमाप्तिः; अपवर्गे गम्यमाने कालाध्वनोरत्यन्तसं
योगे तृतीया विभक्तिर्भवति मासेनानुवाकोधीतः; संवत्सरेणानुवाकोऽधीतः; क्रोशे
नानुवाकोऽधीतः; योजनेनानुवाकोऽधीतः; कर्तव्यावृत्तौ तु फलसिद्धेरभावान्न तृती
या न भवति मासमधीतोऽनुवाको न चानेन गृहीतः; द्विसप्तमीपञ्चम्यौ कारकमध्ये काला
ध्वनोरिति वर्तते कारकयोर्मध्ये यौ कालाध्वानौ ताभ्यां सप्तमीपञ्चम्यौ विभक्ती भवतः;
अद्य भुक्त्वा देवदत्तो द्व्यहे भोक्ता द्व्यहाद्भोक्ता कर्तृशक्त्योर्मध्ये कालः; इहस्थोऽयं
मिष्वासः; क्रोशे लक्ष्यं विध्यति क्रोशाल्लक्ष्यं विध्यति कर्तृकर्मणोः; कारकयोः; कर्मापादान
योः; कर्मणीति कर्मणि यो वा मध्ये क्रोशः; संख्यानानुदेशो न भवति अस्य चानुकर्मप्रवचनी
ययुक्ते द्वितीया कर्मप्रवचनीये युक्ते द्वितीया विभक्तिर्भवति अनुकल्पस्य स्वलिङ्गमनुप्राव
र्षत् अनु अगस्त्यं सन्त्यासि चन्द्रजाः; यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी कर्मप्रवचनीय
युक्ते इति वर्तते यस्मादधिकं तत्र यस्य चेश्वरवचनं तत्कर्मप्रवचनीये युक्ते तत्र सप्तमीवि
भक्तिर्भवति उपखार्यां द्रोणः; उपनिष्के कार्षापणं यस्य चेश्वरवचनमिति स्वस्वामिनोर्द्वयो
रपि पर्यायेण सप्तमी विभक्तिर्भवति अधि ब्रह्मदत्ते पञ्चालाः; अधि पञ्चालेषु ब्रह्मदत्तः; द्विती
यापवादो योगः; ५ पञ्चम्यपाङ्परिभिः; अपपरी वर्जने; कर्मप्रवचनीयैर्युक्ते पञ्चमी
विभक्तिर्भवति अपत्रिगर्तेभ्यो वृष्टो देवः; आपाटलिपुत्राद्वृष्टो देवः; परित्रिगर्तेभ्यो वृ

ष्टो देवः आपाटलिपुत्राद्वृष्टो देवः परि त्रिगर्तेभ्यो वृष्टो देवः अपेन साहचर्यात्परे
र्वर्जनार्थस्यैव ग्रहणं लक्षणादिषु न भवति वृक्षं परि विद्योतते विद्युत् १० प्रतिनि
का धिप्रतिदाने च यस्मात् मुख्यस्सदृशः प्रतिनिधिः दत्तस्य निर्यातनं प्रतिदानं यस्मात्प्र
का तिनिधिर्यतश्च प्रतिदानं तत्र कर्मप्रवचनीययुक्ते पंचमी विभक्तिर्भवति अभिमन्यु
शि रर्जुनतः प्रति प्रद्युम्नो वासुदेवतः प्रति; माषानस्मै तिलेभ्यः प्रतियच्छति ननु प्र
का तिनिधिप्रतिदाने कर्मप्रवचनीययुक्ते ननु यतः प्रतिनिधिप्रतिदाने संबंधसंब
धात्तस्यापि योगोऽस्त्येव गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि गत्यर्थानांधा
५२ तूनां चेष्टाक्रियाणां परिस्पंदक्रियाणां कर्मणि कारके द्वितीयाचतुर्थ्यौ विभ
क्ती भवतः; ग्रामं गच्छति ग्रामं गच्छति ग्रामाय गच्छति नगरं व्रजति नगराय व्रजति गत्यर्थ
ग्रहणं किं उदनं पचति कर्मणीति किं अश्वेन व्रजति चेष्टायामिति किं मनसा पाटलिपु
त्रं गच्छति अनध्वनीति किं अध्वानं गच्छति अध्वन्यपि ग्रहणं पंथानं गच्छति मार्गं गच्छति
आस्थितप्रतिषेधो वक्तव्यः आस्थितः संप्राप्तः संक्रांत उच्यते यच्च उत्पथेन पंथानं ग
च्छति तत्र भवितव्यमेव चतुर्थ्या अध्वनं गच्छति पंथं गच्छति । द्वितीयाग्रहणं किं न चतु
र्थ्येव विकल्पेन अपवादविषये पि यथा स्यात् ग्रामं गंता ग्रामाय गंता कृद्योगलक्ष
णा षष्ठी न भवति १२ चतुर्थी संप्रदाने संप्रदाने कारके चतुर्थी विभक्तिर्भवति उपाध्याया
य गां ददाति माणवकाय भिक्षां ददाति देवदत्ताय रोचते पुष्पेभ्यः स्पृहयति चतुर्थीविधा
ने तादर्थ्य उपसंख्यानं यूपाय दारु कुंडलाय हिरण्यं रंधनाय स्थाली अवहननायोलूखल
क्लृपि संपद्यमाने चतुर्थी वक्तव्या मूत्राय कल्पते यवागूः उच्चाराय कल्पते यवान्नं क्लृ
पीत्यपेक्षितं मूत्राय संपद्यते यवागूः मूत्राय जायते यवागूः उत्पातेन ज्ञाप्यमाने च
तुर्थी वक्तव्या वाताय कपिला विद्युत् आतपायातिलोहिनी पीता वर्षाय विज्ञेया दु
र्भिक्षाय सिता भवेत् इत्यादि हितयोगे चतुर्थी वक्तव्या गोभ्यो हितं ब्राह्मणाय हितं
न १३ क्रियार्थोपपदस्य च कर्मणि स्थानिनः क्रियार्था क्रिया उपपदं यस्य सोयं क्रियार्थोपप

दस्य चास्याविनो व्रज्यमानस्य धातोः कर्मणि कारके चतुर्थी विभक्तिर्भवति । क्रिती
यापदादेर्योगः । एधेभ्यो व्रजति फलेभ्यो व्रजति । क्रियार्थोपपदस्येति किं प्रविश पिण्डीश्र
विशतर्पणं भक्षिरन्नस्थाली न तु क्रियार्थोपपदः कर्मणीति किं एधेभ्यो व्रजति शकटेन
स्थानिन इति किं एधानाहर्तुं व्रजति ॥ तुमर्थाच्च भाववचनात् तुमुना समानार्थस्तुमर्थः
तुमर्थभाववचनप्रत्ययान्तात् प्रातिपदिकाच्चतुर्थी विभक्तिर्भवति भाववचनाश्चे
ति वक्ष्यति तस्येदं ग्रहणं पाकाय व्रजति त्यागाय व्रजति भूतये व्रजति संपत्तये व्रज
ति तुमर्थादिति किं पाकस्त्यागो रागः भाववचनादिति किं कारको व्रजति ॥ नमः स्वस्ति
स्वाहा स्वधालंवषड्योगाच्च नमः स्वस्ति स्वाहा स्वधा अलं वषट् इत्येतैर्योगे चतुर्थी वि
भक्तिर्भवति नमो देवेभ्यः स्वस्ति प्रजाभ्यः स्वाहाग्नये स्वधा पितृभ्यः अलं मल्लो मल्लाय
अलमिति पर्याप्त्यर्थग्रहणं प्रभुर्मल्लो मल्लाय शक्तो मल्लो मल्लाय वषडिन्द्राय वषडि
न्द्राय चकारः पुनरस्यैव समुच्चयार्थः तेनाशीर्विवक्षायामपि चतुर्थी वापि स्याच्चतुर्थ्ये
वं भवति स्वस्ति गोभ्यः स्वस्ति ब्राह्मणेभ्यो भूयात् ॥ मन्यकर्मण्यनादरे विभाषाप्राणिषु
मन्यतेः कर्मणि मन्यकर्मणि के मन्यकर्मणि प्राणिवर्जिते विभाषा चतुर्थी विभक्तिर्भव
ति अनादरे गम्यमाने अनादरस्तिरस्कारः न त्वां तृणं मन्ये न त्वां तृणाय मन्ये न त्वां बु
सं मन्ये न त्वां बुसाय मन्ये न त्वां तृणं मन्ये मन्यतिग्रहणं किं न त्वां तृणं चिन्तयामि वि
कर्मणि दैवं कः किमर्थः न त्वां तृणं मन्ये मनु अवबोधने अनादर इति किं अनुमाने दृषदं
मन्ये मन्यकार्यमुक्तबुद्धल यथा यात्रासु तं मन्ये यस्य मानात्तन्नपनुपति अप्राणिष्विति किं न
त्वां शृगालं मन्ये यदेतदप्राणिष्विति तदनावादिष्विति वक्तव्यं व्यवस्थितविभाषा च विज्ञे
या न त्वां नावं मन्ये यावत्तीर्णं न नावं मन्ये न त्वामन्नं मन्ये यावन्न भुक्तं श्राद्धं प्राणि
ष्वमत्र न त्वां काकं मन्ये न त्वां शृगालं मन्ये इह चतुर्थी न भवति न त्वां श्वानं मन्ये
न त्वां शुने मन्ये युष्मदः कस्मान्न भवति एतदर्थादिकिमर्थानीतेः कर्मणो व्यवस्थितविभाषात्वे

नान देवेन भवति १७ कर्तृकरणयोस्तृतीया कर्तरि करणे च कारके तृतीया विभक्ति-
र्भवति देवदत्तेन कृतं यज्ञदत्तेन कृतं करणे दात्रेण लुनाति परशुना छिन-
का त्ति तृतीया विधाने प्रकृत्यादिभ्य उपसंख्यानं प्रकृत्याभिरूपः प्रकृत्या दर्शनीयः
प्रायेण याज्ञिकः प्रायेण वैयाकरणः गार्ग्योस्मि गोत्रेण समेन धावति विषमेण धा-
त्रि वति द्विद्रोणेन धान्यं क्रीणाति पंचकेन पशून् क्रीणाति १८ सहयुक्तेऽप्रधाने सहार्थेन यु-
क्ते प्रधाने तृतीया दि सं बंधः; तु कृतेनो चयुते पुत्रस्य तृतीयमाना इति तस्या प्राधान्यं स-
५२ हार्थेन च योगे विधानात् पर्याय प्रयोगे पि भवति पुत्रेण सार्द्धमिति विनापि तद्येन
भवति वृद्धो यूनेति निपातनात् अप्रधान इति किं शिष्येण सहोपाध्यायस्य गौः १९ येनांग
५३ विकारः अंगमंगव्यां अंगसमुदाये प्रसीरवतनं येनेति चक्षुरपदवाच्यो हेतुत्वेनानि द्वितीयेन
येनांगेन विकृतेनांगिनो विकारो लक्ष्यते ततस्तृतीया विभक्तिर्भवति अक्ष्णा काणः पा-
देन खञ्जः पाणिना कुणिः अवयवधर्मेण समुदायो व्यपदिश्यते अंगविकार इति किं अक्षि
काणमस्य २० इत्थंभूतलक्षणे कंचित्प्रकारं प्राप्त इत्थंभूतस्तस्य लक्षणमित्थंभूतलक्ष-
णं तत्र तृतीया विभक्तिर्भवति अपि भवान् कमण्डलुना छात्रमद्राक्षीत् छात्रेणोपाध्या-
यं शिष्य याच परिव्राजक इत्थंभवति कमंडलुपाणिः छात्र इति लक्षणस्य समासेनाभिधान-
त्वात् इत्थंभूत इति किं वृक्षं प्रति विद्योतनं २१ संज्ञोन्यतरस्यां कर्मणि संपूर्वस्य जानातेः
कर्मणि कारके द्वितीयायां प्राप्तायां अन्यतरस्यां तृतीया विभक्तिर्भवति पित्रा संजानीते
पितरं संजानीते मात्रा संजानीते मातरं संजानीते २२ हेतौ फलसाधनयोग्यः पदार्थो हेतुरु-
च्यते लोके तद्वाचिनस्तृतीया विभक्तिर्भवति धनेन कुलं कन्यया शोकः विद्यया यशः २३ अक-
र्तर्यृणे पंचमी हेताविति वर्तते कर्तृवर्जितं यदृणं हेतुभूतं पंचमी विभक्तिर्भवति तृती-
यापवादो योगः शताद्बद्धः सहस्राद्बद्धः अकर्तरीति किं शतेन बंधितः ऋनमृणाम भवति
प्रयोजकत्वाद्धेतुकर्तृसंज्ञं २४ विभाषा गुणेऽस्त्रियां हेतावितिवर्तते गुणे हेतावस्त्रीलिंग

विभाषया पंचमी विभक्तिर्भवति जाड्येन बद्धः । पाण्डित्यान्मुक्तः । पाण्डित्येन मुक्तः । गुणाग्र
हणात् किं धनेन कालत्र्यस्त्रियामिति किं बुद्ध्या मुक्तः । प्रज्ञया मुक्तः । २५ षष्ठी हेतुप्रयो
गे हेतोः । प्रयोगः । हेतुशब्दस्य प्रयोगे हेतौ द्योत्ये षष्ठी विभक्तिर्भवति अध्ययनस्य
हेतोर्वसति अन्नस्य हेतोर्वसति २६ सर्वनाम्नस्तृतीया च सर्वनाम्नो हेतुप्रयोगे हेतौ
द्योत्ये तृतीया विभक्तिर्भवति षष्ठी च पूर्वेण षष्ठ्यामेव प्राप्तायामिदमुच्यते कस्य
हेतोर्वसति केन हेतुना वसति निमित्तकारणहेतुषु सर्वासां प्रायो दर्शनं किंनि
मित्तं वसति केन निमित्तेन वसति कस्मै निमित्ताय वसति कस्मान्निमित्ताद्वसति
कस्य निमित्तस्य वसति कस्मिन्निमित्ते वसति कस्मै निमित्ताय वसति कस्मान्नि
मित्ताद्वसति कस्य निमित्तस्य वसति कस्मिन्निमित्ते वसति एवं कारणहेत्वोः रूपमुदा
हार्यं अर्थग्रहणं चेत्तन्न्यायोपपादनं तु स्वरूपविधिमाविज्ञायीति तेन हेता विभ
वति किं प्रयोजनं वसति केन प्रयोजनेन वसति कस्मै प्रयोजनाय वसति क
स्मात्प्रयोजनाद्वसति कस्य प्रयोजनस्य वसति कस्मिन्प्रयोजने वसति २७ अपादा
ने पंचमी अपादाने कारके पंचमी विभक्तिर्भवति ग्रामादागच्छति पर्वतादवरोहति वृके
भ्यो बिभेति अध्ययनात्पराजयते पंचमीविधाने ल्यब्लोपे कर्मण्युपसंख्यानं प्रासा
दमारुह्य प्रेक्षते प्रासादात्प्रेक्षते अधिकरणे चोपसंख्यानं आसने उपविश्य प्रेक्षते
आसनात्प्रेक्षते प्रश्नाख्यानयोश्च पंचमी वक्तव्या कुतो भवान् पाटलिपुत्रात् यतश्चा
ध्वकालनिर्माणं तत्र पंचमी वक्तव्या गवेधुमतः सांकाश्यं चत्वारि योजनानि कार्त्ति
क्या आग्रहायणी मासे तत्र युक्तात्काले सप्तमी वाच्या कार्त्तिक्या आग्रहायणी मासे
अध्वनः प्रथमा च सप्तमी वाच्या गवेधुमतः सांकाश्यं चत्वारि योजनानि चतुर्षु योज

नेषु २८ अन्यारादितरर्त्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते अन्य आरात् इतर ऋते दि
क्शब्द अञ्चूत्तरपद आच् आहि इत्येतैर्युक्ते पञ्चमी विभक्तिर्भवति अन्य इत्यर्थग्र
का हणं तेन पर्यायप्रयोगेपि भवति अन्यो देवदत्तात् भिन्नो देवदत्तात् अर्थान्तरं देवद
शि त्तात् विलक्षणो देवदत्तात् आरात् ग्रामात् आरात् दूरान्तिकयोर्वर्त्तते तत्र दूरान्तिकार्थैः षष्ठ्य
का न्यतरस्यामिति प्राप्ते पञ्चमी विधीयते आरात् देवदत्तात् आरात् यज्ञदत्तात् इतर
इति निर्दिष्टप्रतियोगि पदार्थ उच्यते इतरो देवदत्तात् ऋते इति अव्ययं वर्जना
५४ र्थे ऋते देवदत्तात् ऋते यज्ञदत्तात् दिक्शब्दाः पूर्वो ग्रामात् उत्तरो ग्रामात् उत्तरो वसं
तात् ग्रीष्मः पूर्वो ग्रीष्माद् वसन्तः दिक्शब्द इत्यत्र शब्दग्रहणं देशकालवृत्तिनापि यो दि
क्शब्दः स्यात् तदुत्तरपदं प्राक् प्रत्यक् ग्रामात् प्रत्यक् ग्रामात् ननु चायमपि दिक्शब्द एव षष्ठ्य
तसर्थप्रत्ययेनेति वक्ष्यति तस्यायं पुरस्तादपवादः आच् दक्षिणा ग्रामात् उत्तरा
ग्रामात् अत्तरा ग्रामात् आहि दक्षिणाहि ग्रामात् उत्तराहि ग्रामात् २९ षष्ठ्यतसर्थप्रत्य
येन दक्षिणतः ग्रामस्य पुरः ग्रामस्य पुरस्तात् ग्रामस्य उपरि ग्रामस्य उपरिष्टात् ग्रामस्य
३० एनपा द्वितीया एनबन्यतरस्यामदूरेऽपञ्चम्या इति वक्ष्यति तेन योगे द्वितीया विभक्ति
र्भवति पूर्वेण षष्ठ्याः प्राप्तायाः इदं वचनं दक्षिणेन ग्रामं उत्तरेण ग्रामं अत्र षष्ठ्यपीष्यते
दक्षिणेन ग्रामस्य उत्तरेण ग्रामस्य तदर्थयोगविभागः कर्त्तव्यः ३१ पृथग्विनानाना
भिस्तृतीयान्यतरस्यां पञ्चमीग्रहणमनुवर्त्तते पृथग्विनानाना इत्येतैर्योगे तृती
या विभक्तिर्भवति अन्यतरस्यां पञ्चमी च पृथक् देवदत्तेन पृथक् देवदत्तात् विना
देवदत्तेन विना देवदत्तात् नाना देवदत्तेन नाना देवदत्तात् पृथग्विनानानाभिरि
ति योगविभागः कर्त्तव्यः द्वितीयार्थे विना वातं विना वर्षेण विद्योतमानपि वि[illegible]

कृत्तिकृतानुदोषानुकेने मोपानि तौ कुमौ त्रुह करणे च स्तोकाल्पकृच्छ्रकतिपयस्या-
सत्त्ववचनस्य स्तोकाल्पकृच्छ्रकतिपय इत्येतेभ्यो ऽसत्त्ववचनेभ्यः करणे कार-
के ऽन्यतरस्यां तृतीया विभक्तिर्भवति पंचम्यन्नपचो विधीयते तृतीया तु करणे इत्ये-
व सिद्धा यदा तु कर्ममात्रे करणे तथा विवक्ष्यते न द्रव्ये तदा स्तोकादीनामसत्त्व-
वचनानां स्तोकान्मुक्तः। स्तोकेन मुक्तः। अल्पान्मुक्तः। अल्पेन मुक्तः। कृच्छ्रान्मुक्तः। कृच्छ्रे-
ण मुक्तः। कतिपयान्मुक्तः। कतिपयेन मुक्तः। असत्त्ववचन इति किं स्तोकेन विषे-
ण हतः। अल्पेन सीधुना मत्तः। करणे इति किं क्रियाविशेषणे कर्मणि मा भूत् स्तोकं प-
चति। दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्। पंचम्यनुवर्तते दूरान्तिकार्थैः योगे षष्ठी
विभक्तिर्भवति अन्यतरस्याम्। दूरं ग्रामस्य दूरं ग्रामात्। विप्रकृष्टं ग्रामस्य विप्रकृष्टं ग्रा-
मात्। अन्तिकं ग्रामस्य अन्तिकं ग्रामात्। अभ्याशं ग्रामस्य अभ्याशं ग्रामात्। अन्तिकं स्या-
[illegible] दूरान्तिकार्थेभ्यो द्वितीया च। पंच-
म्यनुवर्तते दूरान्तिकार्थेभ्यः प्रातिपदिकेभ्यो द्वितीया विभक्तिर्भवति पंचमी च तृतीया च।
[illegible] दूरं ग्रामस्य दूरेण ग्रामस्य अन्तिकं ग्रामस्य अन्तिकाद्ग्रा-
मस्य अन्तिकेन ग्रामस्य। प्रातिपदिकार्थे विधानं असत्त्ववचनग्रहणं चानुवर्तते
[illegible] दूरं पथः। दूरायपथे [illegible] दूरस्य पथः।
सत्त्ववचनेभ्यो [illegible] विभक्तयो भवन्ति। [illegible] सप्तमी विभक्तिर्भवति चकारात् दूरान्ति-
[illegible] सप्तम्यधिकरणे च। [illegible] दूरान्तिकार्थेभ्यः। खल्वपि दूरे ग्रामस्य अन्तिके ग्राम-
कोर्थेभ्यश्च [illegible] विभक्तयो भवन्ति। द्वितीयातृतीयापंचमीसप्तम्यः
स्य दूरान्तिकार्थेभ्यश्च [illegible] कर्मणि [illegible] प्रधाने अधीनं [illegible]
सौ विधाने [illegible] सप्तमी [illegible] सा पुदेवदत्तो मातामि [illegible]
के ग्रामान्तो [illegible] साधु [illegible]

ध्यपि तदि कारकाणां च कारकत्वे सप्तमी वक्तव्या ऋद्धेषु भुंजानेषु दरिद्रा आसते ब्रा
ह्मणेषु तरत्सु वृषला आसते अकारकाणां चाकारकत्वे सप्तमी वक्तव्या दरिद्रेष्वा
सीनेषु ऋद्धा भुंजते वृषलेष्वासीनेषु ब्राह्मणास्तरंति तद्विपर्यासे च सप्तमी वक्तव्या चर्म
का णि द्वीपिनं हंति दंतयोर्हंति कुंजरं केशेषु चमरीं हंति सीम्नि पुष्कलको हतः । सू० यस्य
शि च भावेन भावलक्षणं सप्तमीति वर्त्तते । भावः क्रिया । यस्य च भावेन यस्य क्रियया क्रियांतर
का लक्ष्यते ततो भाववतः सप्तमी विभक्तिर्भवति प्रसिद्धा च क्रिया क्रियांतरं लक्षयति गोषु
दुह्यमानासु गतः । दुग्धास्वागतः । अग्निषु हूयमानेषु गतः । हुतेष्वागतः । भाव इति किं यो
५५ जटाभिः स भुंक्ते पुनर्भावग्रहणं किं यो भुंक्ते स देवदत्तः । सू० षष्ठी चानादरे पूर्वेण सप्तम्यां
प्राप्तायां षष्ठी विधीयते चकारात् सापि भवति अनादराधिके भावलक्षणे भाववतः षष्ठीस
प्तम्यौ विभक्ती भवतः । रुदतः प्राव्राजीत् रुदति प्राव्राजीत् क्रोशतः प्राव्राजीत् क्रोशति प्र
व्राजीत् क्रोशंतमनादृत्य प्रव्रजित इत्यर्थः । सू० स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्र
सूतैश्च षष्ठीसप्तम्यौ विभक्ती भवतः । गवां स्वामी गोषु स्वामी गवामीश्वरः । गोष्वीश्वरः ।
गवामधिपतिः । गोष्वधिपतिः । गवां दायादः । गोषु दायादः । गवां साक्षी गोषु साक्षी गवां
प्रतिभूः । गोषु प्रतिभूः । गवां प्रसूतः । गोषु प्रसूतः । षष्ठ्यामेव प्राप्तायां पक्षे सप्तमी विधाना
र्थमिदं वचनं । सू० आयुक्तकुशलाभ्यां चासेवायां षष्ठीसप्तम्यौ वर्त्तेते आयुक्तो व्यापारि
तः । कुशलो निपुणः । ताभ्यां योगे आसेवायां गम्यमानायां षष्ठीसप्तम्यौ विभक्ती भवतः । आ
सेवा तात्पर्यं आयुक्तः कटकरणस्य आयुक्तः कटकरणे । कुशलः कटकरणस्य कुशलः
कटकरणे आसेवायामिति किं आयुक्तो गौः । शकटे ईषद्युक्त इत्यर्थः । तत्र सप्तम्येवाधिकर
णे भवति । सू० यतश्च निर्द्धारणं षष्ठीसप्तम्यौ वर्त्तेते जातिगुणक्रियाभिः समुदायादेकदेशस्य
पृथक्करणं निर्द्धारणं यतो निर्द्धारणं ततः षष्ठीसप्तम्यौ विभक्ती भवतः । मनुष्याणां क्षत्रि
यः शूरतमः । मनुष्येषु क्षत्रियः शूरतमः । गवां कृष्णा संपन्नक्षीरतमा गोषु कृष्णा संपन्न
क्षीरतमा अध्वगानां धावंतः । शीघ्रतमाः अध्वगेषु धावंतः । शीघ्रतमः । सू० पंचमी विभक्ते ॥

यतश्च निर्धारणमिति वर्त्तते षष्ठीसप्तम्यपवादो योगः विभागो विभक्तं यस्मिन्निर्धारणे
श्रेयो विभक्तमेलितं तत्र पञ्चमी विभक्तिर्भवति माथुराः पाटलिपुत्रकेभ्य आढ्यतराः
सुकुमारतराः ॥ ८२ ॥ साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः साधुनिपुणशब्दाभ्यां योगेऽर्चा
यां सप्तमी विभक्तिर्भवति नचेत्प्रतिः प्रयुज्यते मातरि साधुः मातरि निपुणः पितरि नि
पुणः अर्चायामिति किं साधुर्भृत्यो राज्ञः तत्त्वकथनेन भवति अप्रतेरिति किं साधुर्देव
दत्तो मातरं प्रति अप्रत्यादिभिरिति वक्तव्यं साधुर्देवदत्तो मातरं प्रति मातरमनु मात
रमभि ॥ ८३ ॥ प्रसितोत्सुकाभ्यां तृतीया च प्रसितोत्सुकशब्दाभ्यां योगे तृतीया विभक्ति
र्भवति चकारात्सप्तमी च प्रसितः प्रसक्तो यस्तत्रैव नित्यमेवावबद्धः स उच्यते केशैः प्र
सितः केशैरुत्सुकः केशेषूत्सुकः ॥ ८४ ॥ नक्षत्रे च लुपि तृतीयासप्तम्यावनुवर्त्तेते लुब
न्तान्नक्षत्रशब्दात्तृतीयासप्तम्यौ विभक्ती भवतः पुष्येण पायसमश्नीयात् पुष्ये पाय
समश्नीयात् मघाभिः पललौदनं मघासु पललौदनं नक्षत्र इति किं पञ्चालेषु वसति
लुपीति किं मघाभिः स्वातौ इहकस्मान्न भवति अद्य पुष्यः अद्य कृत्तिका अधिकारो
इति वर्त्तते वचनं तृतीयाविधानार्थं ॥ ८५ ॥ प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे
प्रथमा प्रातिपदिकार्थः संज्ञा लिङ्गं स्त्रीपुंनपुंसकं परिमाणं प्रस्थादि वचनमेकत्वा
दिवचनं प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा विभक्तिर्भवति प्रातिपदि
कार्थे उच्चैः नीचैः लिङ्गग्रहणं किं कुमारी वृक्षः कुण्डमित्यत्रापि यथा स्यात् परिमाणग्र
हणं किं द्रोणः खारी आढकमित्यत्रापि यथा स्यात् वचनग्रहणं किं उक्तेष्वप्येकत्वादि
षु यथा स्यात् एकः द्वौ बहवः प्रातिपदिकग्रहणं किं निपातस्यानर्थकस्य प्रातिपदिक
च मत्ते तत्रापि यथा स्यात् प्रलम्बते अध्यागच्छति ॥ ८६ ॥ संबोधने च आभिमुख्यकरणं संबो
धनं तदधिके प्रातिपदिकार्थे प्रथमा न प्राप्नोति इति वचनं भिदमानस्थाने संबोधने प्रथमा
माविहितात्तदन्तत्वाद्धस्तं आमन्त्रितसंज्ञं भवति तथा चैवोदाहृतं आमन्त्रितं तदन्तम्

आमंत्रितं पूर्वमविद्यमानवदित्येवमादयः ४८ एकवचनं संबुद्धिः आमंत्रितप्रथमा
यायदेकवचनं तत् संबुद्धिसंज्ञं भवति हे पटो हे देवदत्त संबुद्धिप्रदेशाः एङ्ह्र
स्वात्संबुद्धेरित्येवमादयः ४९ षष्ठी शेषे कर्मादिभ्योन्यः प्रातिपदिकार्थव्यतिरिक्तः
का स्वस्वामिसंबंधादिः शेषः तत्र शेषे षष्ठीविभक्तिर्भवति राज्ञः पुरुषः यज्ञोः पादः पितुः
त्रि पुत्रः ५० ज्ञोऽविदर्थस्य करणे जानातेरविदर्थस्य अज्ञानार्थस्य करणे कारके षष्ठीविभ
का क्तिर्भवति सर्पिषो जानीते मधुनो जानीते सर्पिषा करणभूतेन प्रवर्त्तत इत्यर्थः प्रवृ
त्तिवचनो जानातिरविदर्थः अथवा मिथ्याज्ञानवचनः सर्पिषु सक्तः प्रतिहतो वा
५६ चित्तोद्भ्रान्त्या तदात्मना सर्वमेव गात्रं प्रतिपद्यते मिथ्याज्ञानमज्ञानमेव अविदर्थ
५७ स्येति किं स्वरेण पुत्रं जानाति ५१ अधीगर्थदयेशां कर्मणि शेष इति वर्त्तते अधीगर्थाः स्म
रणार्थाः दयिर्दानगतिरक्षणेषु ईश ऐश्वर्ये एतेषां कर्मणि कारके शेषत्वेन विवक्षिते
षष्ठीविभक्तिर्भवति मातुरध्येति मातुः स्मरति पितुः स्मरति सर्पिषो दयते मधुनो दयते
सर्पिष ईष्टे मधुन ईष्टे कर्मणीति किं मातुर्गुणैः स्मरति शेष इत्येव मातरं स्मरति ५२ कृ
ञः प्रतियत्ने सतो गुणान्तराधानं प्रतियत्नः करोतेः कर्मणि कारके शेषत्वेन विवक्षि
ते प्रतियत्ने गम्यमाने षष्ठीविभक्तिर्भवति एधोदकस्योपस्कुरुते गस्तुपत्रस्योपस्कुरु
ते प्रतियत्न इति किं कटं करोति कर्मणीति किं एधोदकस्योपस्कुरुते
तु एधोदकमुपस्कुरुते ५३ रुजार्थानां भाववचनानामज्वरेः रुजार्थो धातूनां भाववचने
ह भावकर्तृकाणां ज्वरवर्जितानां कर्मणि कारके शेषत्वेन विवक्षिते षष्ठीविभक्तिर्भव
ति चौरस्य रुजति रोगः चौरस्यामयति आमयः रुजार्थानामिति किं एति जीवन्तमानन्दो नरं
वर्षशतादपि जीवपुत्रकसामेव नयः साहसमाचर भाववचनानामिति किं नदीकूला
नि रुजति अज्वरेरिति किं चौरं ज्वरयति ज्वरः अज्वरिसंताप्योरिति वक्तव्यं चौरस्य संतापय
ति संतापः शेष इत्येव चौरं रुजति रोगः ५४ आशिषि नाथः नाथृ नाधृ याच्ञोपतापैश्वर्या

ङ्गीः। पुष्प्यते तस्याङ्गीः। क्रियस्य कर्मणि कारके षष्ठी विभक्तिर्भवति सर्पिषो नाथते मधु
नो नाथते आशिषीति किं माणवकमुपनाथति अंग पुत्र काधीष्व ५५ जासिनिप्रहण
नाटक्राथपिषां हिंसायां जासिनिप्रहणनाटक्राथपिष इत्येतेषां हिंसाक्रियाणां क
र्मणि कारके षष्ठी विभक्तिर्भवति जसु हिंसायां जसु ताडने इति चुरादौ पठ्यते तस्ये
दं ग्रहणं न देवादिकस्य जसु मोक्षणे इत्यस्य चौरस्योज्जासयति निप्रहण इति संघा
तविगृहीतविपर्यस्तग्रहणं चौरस्य निप्रहन्ति चौरस्य निहन्ति चौरस्य प्रहन्ति चौरस्य
प्रणिहन्ति चौरस्योन्नाटयति वृषलस्योन्नाटयति चौरस्य क्राथयति वृषलस्य क्राथ
यति निपातनाद्वृद्धिः। अयं हि घटादौ पठ्यते श्रथ क्नथ क्रथ क्लथ हिंसार्था इति तत्र घ
टादयो मित इति मित्त्वात् ह्रस्वत्वं स्यात् चौरस्य पिनष्टि वृषलस्य पिनष्टि। हिंसायामिति
किं धानाः पिनष्टि। शेष इत्येव चौरमुज्जासयति एषामिति किं चौरं हिनस्ति निप्रहण इति
किं चौरं विहन्ति ५६ व्यवहृपणोः समर्थयोः व्यवहृपण इत्येतयोः समानार्थयोः कर्मणि
कारके षष्ठी विभक्तिर्भवति द्यूते क्रयविक्रयव्यवहारे च समानार्थत्वमनयोः। शतस्य
व्यवहरति सहस्रस्य व्यवहरन्ति शतस्य पणते सहस्रस्य पणते न्याय्यं। प्रत्ययं। कस्मान्न भ
वति लुप्तार्थस्य पुण्यतेर्न्यायं। प्रत्यय इष्यते समर्थयोरिति। किं शलाकां व्यवहरति ब्राह्मण
नुपणायते सोत्तमर्थं। शेष इत्येव शतं पणायते। ५७ दिवस्तदर्थस्य व्यवहृपणोः समानार्थस्य
दीव्यतेः कर्मणि षष्ठी विभक्तिर्भवति शतस्य दीव्यति सहस्रस्य दीव्यति तदर्थस्येति किं ब्राह्म
णं दीव्यति योगविभाग उत्तरार्थः ५८ विभाषोपसर्गे दिवस्तदर्थस्येति निवृत्ता षष्ठी प्राप्ता यो
सोपसर्गस्य विकल्प उच्यते उपसर्गे सति दिवस्तदर्थस्य कर्मणि कारके विभाषा षष्ठी विभ
क्तिर्भवति शतस्य प्रतिदीव्यति सहस्रस्य प्रतिदीव्यति शतं प्रतिदीव्यति सहस्रं प्रतिदीव्य
ति उपसर्ग इति किं शतस्य दीव्यति तदर्थस्येत्येव शलाकां प्रतिदीव्यति ५९ द्वितीया ब्राह्म
णे ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य [illegible] कारके। द्वितीया विभक्तिर्भवति गामस्य

मदहः सभायां दीव्येयुः अनुपसर्गस्य षष्ठ्यां प्राप्तायां इदं वचनं सोपसर्गस्य तु छंदसि
व्यवस्थितविभाषया। पि सिध्यति ६० प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने प्रेष्य इत्येत
का दैवादिकस्य लोएमध्यमपुरुषस्यैकवचनं तत्साहचर्यात् ब्रुवेरपि तद्विषय एव
ग्रि गृह्यते प्रेष्यब्रुवोर्हविषः कर्मणः षष्ठी विभक्तिर्भवति देवतायां संप्रदाने सति अग्नये
का छागस्य हविषो वपाया मेदसः प्रेष्य अग्नये छागस्य हविषो वपाया मेदसोनुब्रूहि
प्रेष्यब्रुवोरिति किं अग्नये छागं हविर्वपां मेदो जुहुधि हविष इति किं अग्नये गोमयानि
५६ प्रेष्य देवतासंप्रदान इति किं माणवकाय पुरोडाशं प्रेष्य हविषः प्रस्थितस्य प्रतिषे
५७ धो वक्तव्यः इंद्राग्निभ्यां छागं हविर्वपां मेदः प्रस्थितं प्रेष्य ६१ चतुर्थ्यर्थे बहुलं छंदसि छंदसि वि
षये चतुर्थ्यर्थे षष्ठी विभक्तिर्भवति बहुलं पुरुषमृगश्चंद्रमसः पुरुषमृगश्चंद्रमसे गोधा
कालका दार्वाघाटस्ते वनस्पतीनां ते वनस्पतिभ्यः बहुलग्रहणं किं कालो रात्रौ हिमेवनेष
ष्ठी षष्ठ्यर्थे षष्ठी विभक्तिर्भवति बहुलं पुरुषमृगश्च षष्ठ्यर्थे चतुर्थी वक्तव्या या खर्वेण पि
बति तस्यै खर्वो जायते या दतो धावति तस्यै श्यावदन् या नखानि निकृंतति तस्यै कुन
खी यांक्ते तस्यै काणः याभ्यंक्ते तस्यै दुश्चर्मा या प्रलिखति तस्यै खलतिरपमिल्पा
धै जारः ६२ यजेश्च करणे यजेर्धातोः करणे कारके छंदसि विषये बहुलं षष्ठी विभक्तिर्भ
वति घृतस्य यजते घृतेन यजते सोमस्य यजते सोमेन यजते ६३ कृत्वोर्थप्रयोगे कालेधिकर
णे छंदसि बहुलमिति निवृत्तं कृत्वोर्थानां प्रत्ययानां प्रत्ययप्रयोगे कालेधिकरणे षष्ठी वि
भक्तिर्भवति पंचकृत्वोह्नो भुंक्ते द्विरह्नोधीते कृत्वोर्थग्रहणं किं अह्नि शेते रात्रौ शेते प्रयो
गग्रहणं किं प्रकृतिर्भुंक्ते गम्यते द्विः त्रिः चतुरिति न तत्प्रयुज्यमाने भवति कालग्रहणं
किं द्विः कांस्यपात्र्यां भुंक्ते गम्यते द्विः त्रिः अधिकरणग्रहणं किं द्विरह्नो भुंक्ते शेष इत्येव द्विर
हन्यधीते ६४ कर्तृकर्मणोः कृति कृत्प्रयोगे कर्तरि कर्मणि च षष्ठी विभक्तिर्भवति भवतः
शायिका भवत आसिका अपां स्रष्टा पुरां भेत्ता वज्रस्य भर्ता कर्तृकर्मणोरिति किं ग
स्त्रेणाभ्यां कृतीति किं तद्धितप्रयोगे ... कटं भुक्तपूर्वी ओदनं इत्यत्र नि

शेषे त्वं पुनः कर्मग्रहणात् ॥ स्तरयादि कर्त्रादि च कृतीति ब्रूयात् ॥ ६८ उभयप्राप्तौ कर्मणि ॥
पूर्वेण षष्ठी प्राप्ता नियम्यते उभयप्राप्ताविति बहुव्रीहिः उभयोः प्राप्तिर्यस्मिन्
कृति सोयमुभयप्राप्तिः तत्र कर्मण्येव षष्ठी विभक्तिर्भवति न कर्त्तरि च आश्चर्यो गवां
दोहोऽशिक्षितेन गोपालेन रोचते मे ओदनस्य भोजनं देवदत्तेन साधु खलु पयसः
पानं यज्ञदत्तेन बहुव्रीहिविज्ञानात् इह नियमो न भवति आश्चर्यमिदमोदनस्य पा
कः ब्राह्मणानां च प्रादुर्भाव इति अकाकारयोः प्रयोगे नेति वक्तव्यं भेदिका देवदत्तस्य
काष्ठानां चिकीर्षा देवदत्तस्य कटस्य शेषे विभाषा अकाकारयोः स्त्रीप्रत्यययोरिति
इष्णात् नप्प दायाभेषः स्त्रीप्रत्यय एव गृह्यते विचित्रा हि सूत्रस्य कृतिः पाणिनेः के
चिदविशेषेण विभाषामिच्छन्ति शब्दानामनुशासनमाचार्येण आचार्यस्य वा
६५ क्तस्य च वर्तमाने न लोकाव्ययनिष्ठेति प्रतिषेधे प्राप्ते पुनः षष्ठी विधीयते क्तस्य
च वर्तमानकालस्य प्रयोगे षष्ठी विभक्तिर्भवति राज्ञां मतः राज्ञां बुद्धः राज्ञां पूजितः
क्तस्येति किं ओदनं पचमानः वर्तमान इति किं ग्रामं गतः नपुंसके भावे उपसंख्यानं
छात्रस्य हसितं नटस्य भुक्तं मयूरस्य नृत्तं कोकिलस्य व्याहृतं शेषविज्ञानात् सिद्धं तथा च कर्तृविव
क्षायां तृतीयापि भवति ॥ अधिकरणवाचिनश्च ॥ अधिकरणे यः क्तो विहितः तस्य प्रयो
गे षष्ठी विभक्तिर्भवति अयमपि प्रतिषेधापवादो योगः इदमेषामासितं इदमेषां शयितं इ
दं नः कथं यातं इदमेषां भुक्तं इदमेषामशितं पिचकर्मणि प्रयोगे कर्त्तरि कृतिप्रयो
गे विषष्ठी विहिता तावत् तेनायं स्य ग्रामस्य चैत्रः अन्ये प्रधाने कर्मण्याहुः तदा तेना
भवस्य ग्रामं चैत्रः ॥ ६० न लोकाव्ययनिष्ठाखलर्थतृनाम् ॥ कर्मणि ॥ कृतीति षष्ठी प्रा
प्ता प्रतिषिध्यते ल उ उक अव्ययनिष्ठाखलर्थतृन् इत्येतेषां प्रयोगे षष्ठी विभक्तिर्न

भवति लडिति शतृशानचौ कानचावपि स्तः । किकिनौ च गृ चे ते ओदनं पचन्त ओदनं प
चमानः । ओदनं पेचिवान् पपिः । सोमं ददिर्गाः । एकटौ चेकीयुः । ओदनं बुभुजुः । कान्याम
श्री लकदिल्सुः । अकूग्रा गामुजं वाराणसीं सोरद्दाग्राद्धुः । उकप्रतिषेधे कामे भोक्ता यामप्रतिषेधः ।
नू दास्याः । कामुकाः । वृषल्याः कामुकः । अव्यय कं कृत्वा ओदनं भुक्त्वा अव्ययप्रतिषेधे ते
को सन्नू कस्तुनो प्रतिषेधः । पुरास्त्रय स्योदेनो माधेयः । पुमाकूर स्यविसर्पो विरा[illegible]नूकस्
नोऽप्रतिषेधः । पुरास्त्रय स्योदेनो माधेयः । पुमाकूर स्यविसर्पो वि रक्षिनू निष्ठा ओदनं
4 b भुक्तवावान् । देवदत्तेन कृतं खलर्थ ईषत्करः कटो भवता ईषत्पानः सोमो भवता तृ
58 न्निति प्रत्यया स्तारगृहणं लटः शतृशानचावप्रथमासमानाधिकरणे तेन क्वानुः चानश्शत्
णमपि प्रतिषेधो भवति सोमं पचमानः । तृ इमा धा नं । अधीय न्यायाय णो कर्त्ता करान्
वदितं जनता अथवा ध्यानं । दिवि पूर्णमुत्त्वा च नैषौ रं द्विषन् चौरस्य द्विषन् ६८ षाकेनो भवि
ष्यदाधमर्ण्ययो । अकस्य भविष्यति काले विहितस्य इनस्तु भविष्यति चाधमर्ण्ये न च
त्र योगे कर्मणि षष्ठी विभक्तिर्न भवति कटकारको व्रजति ओदनं भोजको व्रजति इणः
वल्त्वपि ग्रामं गमी ग्रामं गामी आधमर्ण्ये शतं दायी सहस्रं दायी भविष्यदाधमर्ण्ये
रितिकि तवानो न लोकाः सत्कृत्ता पायकौ अवतृप्तं कारी कटस्य इत्युक्त्वा नो भवति वचे
णनस्य पूरकः । पुत्रपौत्राणां दक्षकः भविष्यद्धवि कामी वि हितस्या कः स्येदे अकर्ता एक
त्तानां वर्त्तिनां कर्तृकर्मणो कृत्यानीति त्वं षष्ठी प्राप्ता वा तत्र विकल्पेते कृत्यानो के
नेषु द्विप्रयोगे च कर्त्तरि वा षष्ठी विभक्तिर्भवति भवता कटः कर्त्तव्यः । भवतः । कटः कर्त्त व्य
कर्तरि मीति कि गेयो माणवकः सा मनो उभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधो वक्तव्यः । कष्ट को
ग्रामं नृणा यादेव दत्तेन नेतव्या ग्रामं ग्रामा ज्ञेय वनेन ६० तृत्यौ चैरसन्ततौ च । नामास्त

तीयान्यतरस्यां तुल्यार्थैः तुल्यैर्योगे तृतीया विभक्तिर्भवति अन्यतरस्यां तुल्यो
पमाभ्यां वर्जयित्वा पक्षे षष्ठीविधानात् तया मुक्ते षष्ठी भवति तुल्यो देवद
त्तेन तुल्यो देवदत्तस्य सदृशो देवदत्तेन सदृशो देवदत्तस्य अतुलोपमाभ्यामिति
किं तुला देवदत्तस्य नास्ति उपमा कृष्णस्य न विद्यते इति वर्तमाने अन्यतरस्यां ग्रहणं
उत्तरसूत्रे चकारेण तस्यानुकर्षणार्थं भूतस्यादि तृतीयानुकर्षोनु ७१ चतुर्थी चाशि
ष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः आशिषि विगम्यमानायां आयुष्य मद्र भद्र कुश
ल सुख अर्थ हित इत्येतैर्योगे चतुर्थी विभक्तिर्भवति चकारो विकल्पानुकर्षणार्थः
शेषे चतुर्थी विधानात् तया मुक्ते षष्ठी विभक्तिर्भवति आयुष्यं देवदत्ताय भूयात् आयु
ष्यं देवदत्तस्य भूयात् चिरंजीवितं देवदत्ताय भूयात् चिरंजीवितं देवदत्तस्य भूयात् म
द्रं देवदत्ताय भूयात् मद्रं देवदत्तस्य भूयात् भद्रं देवदत्ताय भद्रं देवदत्तस्य कुशलं देवदत्ता
य कुशलं देवदत्तस्य निरामयं देवदत्ताय निरामयं देवदत्तस्य सुखं देवदत्ताय सुखं देव
दत्तस्य शं देवदत्ताय शं देवदत्तस्य अर्थो देवदत्ताय अर्थो देवदत्तस्य प्रयोजनं देवदत्ता
य प्रयोजनं देवदत्तस्य हितं देवदत्ताय हितं देवदत्तस्य पथ्यं देवदत्ताय पथ्यं देव
दत्तस्य आशिषीति किं आयुष्यं देवदत्तस्य नयः ७२ इति वार्त्तिकायां वृत्तौ द्वितीयाध्याय
स्य तृतीयः पादः। द्विगुरेकवचनं। द्विगुः समासः एकवचनं भवति एकस्य वचनं एकवच
नं एकस्यार्थस्य वाचकं भवत्यर्थस्य एकवचनो वा विधीयते। द्विगुश्च एकवचनं नीति
समाहारे द्विगोश्चेदं ग्रहणं नान्यस्य पंचमूलीः समाहृताः पंचमूली दशमूली द्विगवर्थ
स्यैकवद्भावात् अनुप्रयोगे त्वेकवचनं भवति पंचपूली पंचकोभने इति २ [illegible]
।। द्वन्द्वसेनामानो एकवचनं भिविनतोसे [illegible] स्यैकं पदं समासो [illegible] त्रीणिवा

क्षाति संप्रत्ययेन प्राण्यंगानां द्वंद्व एकवद्भवति। तूर्यां तूर्यांगानां सेनांगानां च प्राण्यं
गानां तावत् पाणिपादं शिरोग्रीवं तूर्यांगानां मार्दंगिकपाणविकं वीणावादकप
रिवादकं सेनांगानां रथिकाश्वारोहं रथिकपादातं कौसुम कुलस्य प्रत्यादिपरत्वात्तु बहुव
का द्विविभाषयैव भवितव्यं दुन्दुभेस्तूर्यांगे समाहारे च द्वंद्वौ विहितौ तत्र समाहारस्यैक
शि त्वात्तु सिद्धमेवैकवचनं द्वन्द्वप्रकरणं विषयविभागार्थं प्राण्यंगानां समाहार एव
का द्वंद्वः दधिपयआदीनां द्वन्द्वेतरयोगे एव वृक्षमृगादीनामुभयथेति। २ अनुवादे चर
५८ णानां चरणानां द्वंद्वः शाखानिमित्तकाः पुरुषे वृत्तिरेते चरणानां द्वंद्व एकवद्भ
वति अनुवादे गम्यमाने प्रमाणान्तरावगतस्यार्थस्य शब्देन संकीर्तनमात्रमनु
वादः उदगात्काठकालापं प्रत्यष्ठात्काठकौथुमं कठकालापादीनामुदयप्रतिष्ठे प्र
माणान्तरावगते यदा पुनः शब्देनानूद्येते तदेदमुदाहरणं यदा तु प्रथमत एवोपदे
३ शस्तदा शब्दः प्रवर्तते अनुवाद इति किं उदगुः कठकालापाः स्थेणोरद्यतन्यां चेति व
चनं स्थेणोरिति किं आगुः पुत्रकं अध्वर्युवेदे यस्य क्रतोर्विधानं सोऽध्वर्युक्रतुः अध्वर्यु
क्रतुवाचिनां शब्दानामनपुंसकलिंगानां द्वंद्व एकवद्भवति अध्वर्युक्रतुरनपुंस
कं द्वंद्व इति गौणो निर्देशः अर्काश्वमेधं सायाह्नातिरात्रं अध्वर्युक्रतुरिति किं इषुवज्रौ
इषुवज्रौ उद्भिद्बलभिदौ अनपुंसकमिति किं राजसूयवाजपेये इत्येकस्मात् भवति द्वंद्वो
नोऽष्णासौ क्रतुः शब्दः सोमपानेषु च ष्टः। ५ अध्ययनतोऽविप्रकृष्टाख्यानां अध्ययनेन
योऽसामासौ क्रतुः अविप्रकृष्टा प्रत्यासन्ना आख्या येषां द्वंद्व एकवद्भवति पदकक्रमक
निमित्तेन ये षां अविप्रकृष्टा प्रत्यासन्ना आख्यास्तेषां ... अध्ययनत इति किं पितापुत्रौ
क्रमकवार्त्तिकं सपाठः प्रापानां क्रमसंहितामुत्तराम् अविप्रकृष्टेति किं याज्ञिकवै
अविप्रकृष्टाख्यानामिति किं याज्ञिकवैयाकरणौ ... एजातिरप्राणिनामनुवृत्तिधौचैत्य

हेतुः। सामान्यं नित्यमेकमनेकवृत्ति सामान्त्वं अनेकव्याश्रया जाति जातिवाचिनां शब्दा
नां द्वंद्व एकवद्भवति अप्राणिनो वर्जयित्वा आराशस्त्रि धानाशष्कुलि युगवरत्रं जाति
मिति किं नंदकपांचजन्यौ अप्राणिनामिति किं ब्राह्मणक्षत्रियविट्शूद्राः नतिप्रयुक्त
न्यायेन द्रव्यजातीनामयमेकवद्भावो न गुणक्रियाजातीनां रूपरसगंधस्पर्शाः; गम
नाकुंचनप्रसारणानि जातिधर्मत्वे च सति जातिशब्दानामयमेकवद्भावो नानियम
द्रव्याविवक्षायां बदरामलकानि तिष्ठंतीति ६ विशिष्टलिंगो नदीदेशोऽग्रामाः। वि
शिष्टवाचिनां भिन्नलिंगानां नदीवाचिनां देशवाचिनां च ग्रामवर्जितानां द्वंद्व ए
कवद्भवति नद्यवयवो द्वंद्वो नदीत्युच्यते देशावयवश्च देशः; नदीदेश इति समासनि
र्देशश्चैवायं उद्ध्यश्च इरावती च उद्ध्येरावति नदीग्रहणं देशग्रहणं च लाघवार्थं कुरवश्च कुरुक्षे
त्रं च कुरुकुरुक्षेत्रं कुरुजांगलं विशिष्टलिंगा इति किं गंगायमुने मद्रकेकयाः नदीदेश
इति किं जांबवं वत्स्थ शालूकिनी च जांबवशालूकिन्यौ नदीग्रहणमस्य देशत्वान् जनपदोऽपि
देशः स्वे नद्यश्च पर्वतानां ग्रहणं न भवति कैलासश्च गंधमादनं च कैलासगंधमादने अग्रा
मा इत्यत्र नगराणां प्रतिषेधो वक्तव्यः; इह माभूत् मथुरा च पाटलिपुत्रं च मथुरापाटलि
पुत्रे उभयतश्च ग्रामाणां प्रतिषेधो वक्तव्यः; शौर्यं च नगरं केतवता च ग्रामः; शौर्यकेतव
ते ७ क्षुद्रजन्तवः; अपचितपरिमाणाः; क्षुद्रः; क्षुद्रजन्तुवाचिनां द्वंद्व एकवद्भवति दंशमशकं
यूकालिक्षं क्षुद्रजंतव इति किं ब्राह्मणक्षत्रियौ क्षुद्रजंतुरनस्थिः स्यात् अथवा क्षुद्र एव यः;
शतं वा प्रसृतो येषां केचिदा नकुलादपि आनकुलादपीति इयमेव स्मृतिः; प्रमाणं इत
मूसां नादि नो धानु ८ येषां च विरोधः शाश्वतिकः; विरोधो वैरं शाश्वतिको नित्यः; येषां शाश्व
तिको विरोधः तद्वाचिनां शब्दानां द्वंद्व एकवद्भवति मार्जारमूषकं श्वशृगालं अहिनकु
लं शाश्वतिक इति किं गोपालशू दायंते चकारः पुनरस्यैव समु

चयार्थः। तेन पशुशकुनिद्वंद्वेऽपि तेऽपि नित्यमेकवद्भावो भवति। अश्वमहिषं
काकोलूकं। ९। शूद्राणामनिरवसितानां। अनिरवसितं वहिः। करणकृतो वहिः करणंकृ
तो वहिः। कस्मात् पात्रात्। यैर्भुक्ते पात्रं संस्कारेण न शुध्यति। ते निरवसिताः। न निरवसिताः
का अनिरवसिताः। अनिरवसिताः। अनिरवसितशूद्रवाचिनां शब्दानां द्वंद्व एकवद्भवति
ति तक्षायस्कारं रजकतन्तुवायं। अनिरवसितानामिति किं चंडालमृतपाः। १० गवाश्वप्रभृती
का नि च। गवाश्वप्रभृतीनि कृतैकवद्भावानि द्वंद्वरूपाणि साधूनि भवंति। गवाश्वं गवावि
६० कं गवैडकं अजाविकं अजैडकं कुब्जवामनं कुब्जकिरातकं पुत्रपौत्रं श्वचंडालं
स्त्रीकुमारं दासीमाणवकं शाटीपिच्छकं उष्ट्रखरं उष्ट्रशशं मूत्रशकृत् मूत्रपुरीषं य
६० कृन्मेदः मांसशोणितं दर्भशरं दर्भपूतीकं अर्जुनशिरीषं तृणोलपं दासीदासं कुटीकुटं
भागवतीभागवतं। गवाश्वप्रभृतिषु यथोच्चारितं द्वंद्ववृत्ते एकवद्भवति। रूपान्तरे तु ना
यं विधिर्भवति गोश्वं गोश्वौ पशुद्वंद्वविभाषैव भवति। विभाषा वृक्षमृगतृणधान्यव्यंजन
पशुशकुन्यश्ववडवपूर्वापराधरोत्तराणां। वृक्षमृगतृणधान्यव्यंजनपशुशकुन्यश्ववड
वपूर्वापराधरोत्तराणां तेषां द्वंद्वो विकल्पेन। व्रीहियवं व्रीहियवाः। दधिघृतं दधिघृते
गोमहिषं गोमहिषाः। तित्तिरिकपिंजलं बहुप्रकृतिः फलसेनावनस्पतिमृगशकुनि
क्षुद्रजंतुधान्यतृणानां एषां बहुप्रकृतिरेव द्वंद्व एकवद्भवति न द्विप्रकृतिः। बदरामल
के रथिकाश्वारोहौ प्लक्षन्यग्रोधौ। [redacted] अधिकरणवाचि परस्परविरुद्धं विप्रतिषिद्धं विप्रतिषिद्धा
इति स्वरार्थः गेयं चेयं नेयं जेयं अजग्रहणं किं यावता हलन्तानुण्यत् वक्ष्यति अजन्तभूतपूर्वादपि यथा स्यात् दि
त्स्यं धित्स्यं तकिशसिचतियतिजनीनामुपसंख्यानं तक्यं शस्यं चत्यं यत्यं जन्यं हनो वा
वधः वध्यं घात्यं ६७ पोरदुपधात् पवर्गान्तात् धातोरकारोपधात् यत्प्रत्ययो भवति ण्यतोपवादः शप्यं ल
भ्यं पोरिति किं पाक्यं वाक्यं अदुपधादिति किं कोप्यं गोप्यं तपरकरणं तत्कालावधारणार्थं आप्यं ६८ शकि

किं सहोश्च शकिसहिभ्यामेताभ्यां यत्प्रत्ययो भवति तकारो यतो नावइति स्वरार्थः। गेयं चेयं नेयं जेयं
चेयं नेयं जेयं अजन्तग्रहणं किं यावता हलन्तान्ण्यतं वक्ष्यति अजन्तभूतपूर्वादपि यथा स्यात्। दित्स्यं धि-
त्स्यं तकिशसिचतिजनीनामुपसंख्यानं तकि तक्यं शसि शस्यं चति चत्यं यति यत्यं जनि जन्यं हनो वा व-
धः वध्यं, घात्यं। ९७ पोरदुपधात् पवर्गान्ताद्धातोरकारोपधाद्यत्प्रत्ययो भवति ण्यतोऽपवादः। शप्यं
लभ्यं जभ्यं पोरिति किं पाक्यं वाक्यं अदुपधादिति किं कोप्यं गोप्यं तपरकरणं तत्कालार्थं तथा कारणार्थं आप्यं ९८
शकिसहोश्च शकिसहिभ्यामेताभ्यां यत्प्रत्ययो भवति शक्यं सह्यं ९९ गदमदचरयमश्चानुपसर्गे ग-
दमदचरयम इत्येतेभ्योऽनुपसर्गेभ्यो यत्प्रत्ययो भवति गद्यं मद्यं चर्यं यम्यं अनुपसर्ग इति किं प्रगा-
द्यं प्रमाद्यं यमेः पूर्वेण सिद्धे नियमार्थं वचनं चरेराङि चागुरौ आचर्यो देशः। अगुराविति किं आचार्य उप-
नेता १०० अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु अवद्यपण्यवर्या इत्येते शब्दा निपात्यन्ते गर्ह्यपणि-
तव्यानिरोधेषु अर्थेषु यथासंख्यं अवद्यमिति निपात्यते गर्ह्यं चेद्भवति अवद्यं पापं अनुद्यमन्यत् वदः सु-
पि क्यप् च पण्यमिति निपात्यते पणितव्यं चेद्भवति पण्यः कम्बलः। पण्या गौः। पाण्यमन्यत्। वर्येति स्त्रियां निपात्य-
तेऽनिरोधश्चेद्भवति अप्रतिबन्धः। शतेन वर्या वृत्या स्त्रीलिङ्गमिति चेन्न। किमर्थं। वार्या ऋत्विजः। १०१ वह्यं क-
रणं वह्यमिति वहेर्धातोः करणकारके यत्प्रत्ययो निपात्यते वहन्त्यनेनेति वह्यं शकटं करणमिति किं वा-
ह्यमन्यत् १०२ अर्यः स्वामिवैश्ययोः ऋ गतावित्यस्मात् ण्यति प्राप्ते स्वामिवैश्ययोरभिधेययोर्यत्प्र-
त्ययो निपात्यते अर्यः स्वामी अर्यो वैश्यः। यतो नाव इति आद्युदात्तत्वे प्राप्ते स्वामिन्यन्तोदात्तत्वं च वक्तव्यं
स्वामिवैश्ययोरिति किं आर्यो ब्राह्मणः। १०३ उपसर्या काल्या प्रजने उपसर्येति निपात्यते काल्या चेत्प्रजनं भ-
वति उपपूर्वात्सर्तेर्यत्प्रत्ययः। प्राप्तकाला काल्या प्रजनं प्रथमगर्भग्रहणं प्राप्तकाला उपसर्या
गौः। उपसर्या वडवा। प्रजन इति किं उपसार्या शरदि मधुरा। १०४ अजर्यं संगतं अजर्यमिति निपात्यते संगतं
चेद्भवति जीर्यतेर्धातोर्नञ्पूर्वात् संगमने कर्तरि यत्प्रत्ययो निपात्यते न जीर्यतीति अजर्यं आर्यसं-
गतं अजर्यं नोऽस्तु संगतं संगतमिति किं अजरिता कम्बलः। १०५ वदः सुपि क्यप् च अनुपसर्ग इति वर्तते वदे

धातोः सर्वत उपपदे ऽनुपसर्गे कप्रत्ययो भवति चकाराद्घञ्च वृषो घं भ्रमवर्षं सव्यो घं सव्यवर्धं सुधीति किं
वायुः अनुपसर्ग इत्येव प्रवायः। १०६ भुवो भावे भू इत्येतस्माद्धातोः सर्वत उपपदे ऽनुपसर्गे भावे कप्रत्ययो
भवति यत्नेनानुवर्त्तते ब्रह्मभूयं गतः। ब्रह्मत्वं च देवभूयं देवत्वं भावग्रहणमुत्तरार्थं सुधीत्येव भव्यं अनु
पसर्ग इत्येव प्रभवः। १०७ हनस्त च स्यानुपसर्गे इत्यनुवर्त्तते भाव इति च हन्तेर्धातोः सर्वत उपपदे ऽनुप
सर्गे भावे कप्रत्ययो भवति तकारश्चान्तादेशः। ब्रह्महत्या अश्वहत्या सुधीत्येव घातो वर्त्तते युक्तभावे न
भवति अनभिधानात् अनुपसर्ग इत्येव प्रघातो वर्त्तते १०८ पतिस्तुतिशासुवृदृजुषः क्यप्। कप्रत्ययो ऽनुपसर्गे भा
व इति निवृत्तं सामान्येन विधानं पतिस्तुशासुवृदृजुष इत्येभ्यो धातुभ्यः क्यप्प्रत्ययो भवति इत्यः स्तुत्यः शि
ष्यः वृत्यः आदृत्यः जुष्यः। क्वचिद्वर्त्तमानेषु न। क्यप्ग्रहणं बाधकबाधनार्थं ओरावश्यके इति घ्यणं बाधि
त्वा क्यबेव भवति। अवश्यस्तुत्यः वृग्रहणेन वृञो ग्रहणमिष्यते नवृङ्वाच्यं ऋचिजः। शासिदुहिगुहिभ्यो वेति वृ
क्तव्यं शास्यः शास्यः दुह्यः दोह्यः गुह्यः गोह्यः आङ्पूर्वादञ्जेः संज्ञायामुपसंख्यानं आज्यं कत्यमुपेयं इङ्ः एतद्वृप ने
ता। १०९ ऋदुपधाच्चाक्लृपिचृतेः। ऋदुपधात्तु धातोः क्यप्प्रत्ययो भवति कृपिचृतिवर्जयित्वा वृत्यं वृध्यं वृधं
अक्लृपिचृतेरिति किं कल्प्यं चर्त्यं ते कामग्रहणं किं कृतः सनावृत्कान्ते एधते वेभवति कीर्त्यं वाणौ स्रजे एधे द्वन्द्वौ एव्यः।
एतिसुगर्त्या... स सव पूर्वोद्धास भव सम्पो। ११० इ ण्यावन। खनेर्धातोः कप्रत्ययो भवति इकारश्चान्तादेशः। खे
दीचेनि देशुः प्रश्ने वाक्यः तत्रेङ्कारो ये विभाषेत्यान्त्यबाधनार्थं। भृञो ऽसंज्ञायां भृञो धातोः असंज्ञायां क्यप्प्र
त्ययो भवति भृत्यः कर्मकरः। भर्त्तव्य इत्यर्थः। असंज्ञायामिति किं भार्या नाम क्षत्रियाः संपूर्वाद्विभाषा संभृत्याः
संभार्याः संज्ञायां पुंसि दृष्टत्वान्न ते भार्या प्राप्नोति स्त्रियामभावाधिकारात्। स्त्रियां न भार्या प्राप्नोति। ११२ मृजेर्विभाषा
मृजेर्धातोर्विभाषा क्यप्प्रत्ययो भवति ऋदुपधत्वाद्धचाप्त प्राप्तविभाषेयं परिमृज्यः परिमार्ग्यः। ११३ राजसूयसूर्य
मृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः। राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्या इत्येते भ्यः क्यबन्ता निपात्यन्ते
राज्ञा सोतव्यो राजा वा इह सूयते राजसूयः। क्रतुः सरतीति मत्वा क्यप् सर्त्तेरुत्वं सुदत्वं वा रुणाति नाम सुवति स्मरति वा
सूर्यः मृषा पूर्वाद्वदतेः पक्षे यति प्राप्ते नित्यं क्यप् निपात्यते मृषोद्यं। रोचते सौ रुच्यः गुपेरादिक्काचिको संज्ञा
यां कुप्यं गोप्यमन्यत् कृष्टपच्याः कृष्टे पच्यन्ते (©) पच्यानि पानतं नव्यथते व्यथ्याः। ११४ भिद्योद्धौ नदे भि

78

दैऽर्ज्जाते श्च कर्तरि क्यप् निपात्यते नदेऽभिधेये उज्झेर्धत्वं भिनत्ति कूलमिति भिद्यः उज्झति उदकमि
का त्युद्ध्यः नद इति किं भेत्ता उज्झिता ११५ पुष्यसिद्ध्यौ नक्षत्रे पुष्यतेः सिधेश्चाधिकरणे क्यप् निपात्यते
वृ नक्षत्रेऽभिधेये पुष्यन्ति अस्मिन्नर्था इति पुष्यः सिध्यन्त्यस्मिन्निति सिद्ध्यः नक्षत्र इति किं पोषणं से
का धनं ११६ विपूयविनीयजित्या मुञ्जकल्कहलिषु विपूयविनीयजित्य इत्येते शब्दा निपात्यन्ते यथा
संख्यं मुञ्जकल्कहलिषु वाच्येषु विपूर्वात्पवतेर्नयतेश्च जयतेश्च क्यप् निपात्यते
७८ विपूयो मुञ्जः विपव्यमन्यत् विनीयः कल्कः विनेयमन्यत् जित्यो हलिः जेयमन्यत् पूङ्न्यावि भागहे छन्द
सि प्रति अपि इत्येवं पूर्वात् ग्रहेश्छन्दसि विषये क्यप्प्रत्ययो भवति मत्तस्य न प्रतिगृह्यं अपिगृह्यं छन्दसी
ति किं प्रतिग्राह्यं अपिग्राह्यं ११७ पदास्वैरिबाह्यापक्ष्येषु च पदे अस्वैरिणि बाह्यायां पक्ष्ये चार्थे ग्रहेर्धातोः क्य
प्प्रत्ययो भवति पदे तावत् प्रगृह्यं पदं यस्य प्रगृह्यसंज्ञा विहिता अवगृह्यं पदं यस्यावग्रहः क्रियते अस्वै
रिणि परतन्त्रे गृह्यकाः इमे गृहीतका इत्यर्थः बाह्यायां ग्रामगृह्या नगरगृह्या सेना ग्रामनगराभ्यां बहिर्भू
तेत्यर्थः स्त्रीलिङ्गनिर्देशात् अन्यत्र न भवति पक्षे भवः पक्ष्यः वासुदेवगृह्याः अर्जुनगृह्याः तत्पक्षाश्रिता इ
त्यर्थः ११८ विभाषा कृवृषोः कृञो वृषश्च विभाषा क्यप्प्रत्ययो भवति करोतेर्नित्यं प्राप्ते वर्षतेः ऋदुपधा
लक्षणे नित्ये क्यपि प्राप्ते विकल्प आरभ्यते कृत्यं कार्यं वृष्यं वर्ष्यं ११९ युग्यं च पत्रे युग्यमिति निपात्यते पत्रे च प्रव
ति पतत्यनेनेति पत्रं वाहनं युग्यो अश्वः युग्यो हस्ती युजेः क्यप् कुत्वं च भवति निपात्यते पत्र इति किं योग्यमन्यत्
१२० अमावस्यदन्यतरस्याम् अमा इत्युपपदे सहार्थे वर्तते तस्मिन्नुपपदे वसतेर्धातोः कालेऽधिकरणे ण्यत्प्रत्य
यो भवति तत्रान्यतरस्यां वृद्ध्यभावो निपात्यते सह वसतोऽस्मिन् काले सूर्याचन्द्रमसाविति अमावस्या अमावास्या
अमावस्या एकदेशविकृतस्यानन्यत्वात् अमावास्याशब्दे अमावस्याशब्देऽपि गणे भवति
अमावसोरहं ण्यतो निपातनात् वृद्धिर्नार्ये वा वृद्धिः स्वरश्च मेध्यसि सिद्धानि २१ छन्दसि निष्टर्क्यदेव

हिमप्रस्थीयो नहीयो नहीयो [illegible] ष्मयेसयीधयो वन्यखा न्यदेवयज्यां वृक्षात्प्रति वीक्ष्य अस्य वा धमा व्यास
र्थों पचाय्य पृज्ञनि निपृक्तो दयां [illegible] दसि विवये निपात्यंते यो दिरुलक्षा गो नानुपपन्नं नत्सर्वं निपात
नात् सिद्धं निपृक्तं इति कृत्तीछे दत्ते इत्यस्मान्निपूर्वात् कापि प्रा चो गपदाघे न विपर्यये यो निसृष्ट पत्यनि
पात्यते निपृक्तं चित्वा निपुष्काम; देवकुलके उपपदे दृय ने उगो ने वा व्यपूर्वा [illegible] देव दृय; वपूर्वा
दुस्पूर्वा च नैयते; व्यपूर्वाणीर्या उन्नीयां उस्पूर्वान्नुपित्वे; वपूर्वा उद्धि ष्य; नदू प्रस्थान्ताणो स्नुग्वु [illegible] दने
धूहकने एस्सो य[illegible]स्य यां मपां सयासि यामेव निपातनं ध्य यों वने वनू त्वम्यां एतस्माद्वेतपन स्वान्यादे
वकुके उपपदे येजेये प्रकं; पस्पद; विवयज्या स्रवलिंगे निपात्यते ष्याङः पूर्वान्तुष्टे; वपूर्वात्स्थाद्व्ये; पत्तिपूर्वा
नुमिचेः कापूपत्वं च प्रतिवीक्ष्य; भुस्तगपपदे गपेनुव्रस्वावध्यं भाव्यं स्नोद्यं भवतेः स्नौतेश्चान यो गपदा
देर्को भवति। उपपूर्वस्य चि नोते गपदा यादेर्गः उपचाय्य पृड पृडस्यो नत्यदे निपातनं नमे नमू किस्मात मिति चे
व कर्तव्यं कि रूपादन्यत्र उपचेयं पृडमेव निपृक्तं व्यत्ययं विधानूनिसां बन्धे निपातनानातूगपदा यादे [illegible]
नाकुपचाय्ये निपातितो गपदे कस्माच्चनु अस्य यतो विधि; एवं देवकस्मा [illegible] वस्यु चो वप चौ गपविधि [illegible] २२ [illegible]
लो गपेन तु पंच मस्य चे पृष्ठी [illegible] वर्णा ना [illegible] तो [illegible] लेताच्च गप [illegible] स्य यो भवति कायता [illegible] वा वपे वा वप वा च्यं २३ [illegible]
वनूपके [illegible] वनूप भाव्यं [illegible] वनूपके उवर्णा नो [illegible] गप [illegible] स्य यो भवति [illegible] वनूपक [illegible] ला व्यपाच्यं [illegible] वनूपकु
इति किं लाव्यं पच्यं [illegible] वनूपके घोत्स इति चेनु [illegible] समासानुपपत्तिः [illegible] वनूपलाव्य [illegible] वनूप पाच्य मिति ने
ष दोष; मयूरव्यं सकादित्वात्समासो भविष्यति [illegible] पदप्रकृति [illegible] च यति; कस्मिन्नेते २४ [illegible]
रपित लपि [illegible] चमस्य [illegible] पूर्वो [illegible] नो नेय वपि रपि लपि त्रपि चपि [illegible] मस्य [illegible] स्य यो भवति [illegible]
वाद; [illegible] स्यां; याप्यं; वाप्यं; राप्यं; लाप्यं; [illegible] चाम्यं; [illegible] कां; दमे [illegible] २५
[illegible] इति निपात्यते [illegible] नयते [illegible] पूर्वान्नु गपदा यादे [illegible] भवतं; [illegible]
चे [illegible] जहि [illegible] । [illegible] एषा न स्मादनि [illegible] वि नू ष दा [illegible] भवति पने, न स्य चा [illegible]

त्वं नित्यमज्ञातसमणात् यजस्व गार्हपत्यादानीयते दक्षिणाग्निः स ह्यवनीयेन सहैकयोनित्युक्ते तद्विधानं म
न दक्षिणाग्निमात्रेण स्याद्वियोनिर्विकल्प्यते वैतूपकल्पादित्युच्यते आक्षाद्या गार्हपत्या द्वेति आनाय्योऽनित्य
इति चेद्दक्षिणाग्नौ कुतं भवेत् एकयोनौ तु तद्विधाने यो यन्वयाभवेत् २६ प्रणाय्योऽसम्मतौ ज्यविद्य
मानासमस्तजित्स्यात्स्विन्निति ज्ञसम्मति। प्रणय इति निपात्यते असम्मतानिषिद्धये प्रणाय्यश्चौरः असम
मृत्ताविति किं प्रणायोऽन्यः यद्येवं कथमेतत् ज्येष्ठाय पुत्राय पिता ब्रह्म ब्रूयात् (नि छात्राय) प्रणाय्याय ते वासिने नान्य
स्मै कस्मैचनेति सम्मतिरभिलाषोऽप्युच्यते तदभावेन निष्कामतया सम्मतिं ते वासी भवति न स्मै निष्का
माय मो दार्थं युज्यमानायान्ते वासिने प्रणाय्याय ब्रह्म प्रब्रूयादिति प्रयुज्यते २७ पाय्यसान्नाय्यधाय्यामा
नायान्ते वासिने प्रणाय्याय ब्रह्म प्रब्रूयादिति प्रयुज्यते २७ पाय्यसान्नाय्य (नि काय्य) धाय्या मानहविर्निवाससा
मिधेनीषु पाय्यसान्नाय्यनिकाय्यधाय्या इत्येते शब्दा निपात्यन्ते यथासङ्ख्यं मानहविर्निवाससामिधे
न्या चाभिधेयायां पाय्य इति माङो ण्यत्प्रत्ययः आदेः पत्वं च निपात्यते यथासङ्ख्यं मानेहविर्निवासे सामिधे
चय विचि प्रेष्ठ वति पूर्वे निपूर्वान्नेयते चिनोतेरायादेशौ आदिकत्वं च निपात्यते सान्नाय्य हविः सन्नेयमन्यत् उप
यमन्यत् धातोराय आत्वयो निपात्यते सामिधेनी चेद्भवति। निवासो निकाय्यः निचे
त्विति चेदवसनौ चकस्तत्रधाय्योति न तर्वो सामिधेनी चेद्भवति धाय्या सामिधेनीधेयमन्यत् सामधेनीकृच्छ्रः
चासामिधेन्या मपिद्दूयते धाय्याः तु सति अग्निनेता सामिधेनी उच्यते किं तर्हि काचिदेव रूढिशब्देन चयतया
कुण्डपाय्यसञ्चाय्य इत्येतौ निपात्येते क्रतावभिधेये त्वं सोमक्रतुभिरिति २८ क्रतौ कुण्डपाय्यसञ्चाय्यौ
णा यत्स्यायौ निपात्यते क्रतावभिधेये कुण्डपाय्ये नीयां तत्र उपपदे पिबतेर्धातो कृधिकार
ते ण्यपदायादेशौ निपात्येते सचीयते सोमः सञ्चाय्यः अस्मिन्निति कुण्डपाय्यः क्रतुः यत्तो नावं इति स्वर सप्तवाच्ये न
निपात्येते सञ्चीयते सोमः सञ्चाय्यः क्रतुः क्रताविति किं कुण्डपानं संचेयः २९ अग्नौ परिचाय्योपचाय्यसमू
वरिचाय्य उपचाय्य समूह्य इत्येते प्रकाणि निपात्यन्ते अग्नावभिधेये परिपूर्वाच्चिनोतेर्ण्यत्प्रत्ययमायादे

स्य बनिपा त्याते यदि चा स्योग्नि । उपधा य्याः सं पूर्व प स ते । सं त्र सा सां दीर्घो त्वं च ति पा त्यु ते सम्मू र्ख्वां चिन्त्वी न पस्तु वा
मः अग्न्या वि ति किं यदि चे यः सं चे याः सं वा स्य ; सू० चित्या ग्नि चित्ये व चित्य स्य कौ ग्नि चि त्या स्य क स्यु नि पा त्य ते चि
त्यो ग्नि । अग्नि च यन मे वा ग्नि चित्या भा वे य त्प्रत्य यः । ते मां नो य त्र स्वामि भ वति अग्न्या वि ति किं चे य म न्या नु ग्राह
ग्रहणे चौ धा त्वो रिति वर्त ते सर्व धा तु भ्यो ण्वु ल्तृ चौ प्रत्य यौ भवतः । कारकः । कर्ता । हा रकः । हर्ता । च कार सामान्य
गे हु णा वि धा नार्थः । तृ ज्व दयि तृ ज्वि धौ मे य स्तु इति सू० नंदि ग्रहि पचा दि भ्यो ल्यु णि न्य चः । प्रत्येक मा दि श्रा वि । सं वर्धा
त्रि भ्यो ग णे भ्यः स्वः । प्र त्यया यथा सं ख्य भ वन्ति नं द्या दि भ्यो ल्युः । ग्रहा दि भ्यो णि निः । पचा दि भ्यो च नंदि ग्रहि पचा
द य स्त न धा तु पा ठ स न्ति वि शि ष्टा गु ह्य न्ते । कि नंदि नंदनः । रमणः पुंसि वमा दि य ष्यृ ति पदवाणि पुग्न पौ दु न्य प्र वा न यो
नि र्दिष्ट ते नंदि वासि मदि दूषि सो धि वर्द्धि शो भि रो चि भ्यो ण्य न्ते भ्यः संज्ञायां नंदनः । वासवः । मदनः । दूषणः । सा
नः । वर्धनः । शोभनः । रोचनः । सहि तपि दमे । संज्ञायां स हनः । तपनः । दमनः । जल्पनः । रमणः । स हनः । संक र्ष
णः । जनार्दनः । नंदनः । वासवः । मदनः । दूषणः । साधनः । वर्धनः । शोभनः । रोचनः । सहि तपि दमे । संज्ञायां म सनः
तपनः । मदनः । जल्पनः । रमणः । सं क्रंदनः । संकर्षणः । जनार्दनः । पवनः । मधुसूदनः । विभीषणः । लवणः । निपा
तनात् णत्वं चि च्चाविनाशनः । कुलमर्दनः । इति नंद्या दि । ग्रह उत्सह उद्धस उदभ्र स्था स्त्रं स्तं स्पृ श्रा ग्री ग्रा स्त्री ग्र
उद्धा सी उत्सा सी स्था यी मंत्री संमर्दी रक्षः श्रु वस वपू ज्ञा नो ति रक्षी नि श्रा वी नि वा सी नि वा पी नि शु ग्रा यी या चु
द स्व प्ना र्द भज व द व सां प्रति नि वि प्रा ना अया ची अव्या का मी ग्रसं व्या हा नु ग्र व्या जी ग्र मा दी ग्र ना सी ग्र वा सि
ता का री को ना च ति नि । वि हा ना मि न्यो व अ का मी अ हा मी वि व चे दे शो अभि भा वी नू ते अभि भा वी अपराधी उप
ता कारी को ना यति नि बि ह्ना मि रो व अ कार्भ गु सा मी वि ब वे दे शे अभि भा वि म भू ते अभि भा वी अपराधी उपर
धी परि भा वी परि भवी इति ग्रहा दि । पच वच चर वप वद चल पत नद भष प्लव र्दु व चो र क्रम स्ट ग म व द स्ट जार
म र्द न म्र न्द न स्ट देवट देव सेव मे ष कोप मेधन स व ज्ञा दर्श सर्प जीव म ट स्वप च पचा द्यचा कृ ति ग णः । इ ई इगु
पध ज्ञा प्री कि र कः । इगु पधे भ्यो धा तु भ्यो जाना ते । प्री णाते । किरते श्च कः । प्रत्ययो भवति विक्षिपः । विलिखः । बुधः
ज्ञः । नो ना नीति चुः । प्री णाती ति प्रियः । किर्ता ति किरः । देव सेव मे षा दयः । पचा दौ पठि तव्याः । सू० आतश्चोप
सर्गे आ का रांते भ्यो धा तु भ्यः उप सर्गे उपपदे कः प्रत्ययो भवति । आप त्पूर्वा पचा दयः । प्रस्थः । सुग्लः । सुम्लः । चूप
धा प्रा यिद हुः । ग्राः पा घ्रा ध्मा धे दृ हृ ज्ञः । ग्रे ते भ्यो धा तु भ्यः प्रत्ययो भवति पा उत्पिबः । विपिबः । घ्र

९०

घ्रः विजिघ्रः विजिघ्रः ध्मः उद्धमः विधमः धेट् उद्धयः दृशः उत्पश्यः उपसर्गे इति केचिन्नानुवर्तन्ते
ति यनुपः जिघ्रः संज्ञायां प्रतिषेधः व्याघ्रः कृद्ध्यानुपसर्गाल्लिंपविंदधारिपारिवेद्युदेजिचे
तिसातिसाहिभ्यश्च अनुपसर्गेभ्यो लिंपादिभ्यो धातुभ्यः शप्रत्ययो भवति लिंपतीति लिंपः विंदतीति
विंदः धारयतीति धारयः पारयतीति पारयः वेदयतीति वेदयः एवं उद्वेजयः चेतयः सात इति
स्मौ चौरादिकौ धातू सातयः साहयः अनुपसर्गादिति किं प्रलिंपः नौ लिंपेरिति वक्तव्यं निलिंपा देवाः ग
वादिषु विदेः संज्ञायां गोविंदः अरविंदः ॥१७ ददातिदधात्योर्विभाषा दाञो धाञश्च विभाषा शप्रत्ययो भ
वति णप्रत्ययो वा ददः दायः दधः धायः अनुपसर्गादित्येव प्रदः प्रधः ॥१८ ज्वलितिकसंतेभ्यो णः ॥ इति
[illegible] ज्वल दीप्ताविति एवमादिभ्यो धातुभ्यः कसु गताविति एवमंतेभ्यो विभाषा णप्रत्ययो भव
अचोपवादः ज्वलः ज्वालः चलः चालः अनुपसर्गादित्येव प्रज्वलः तनोतेर्णा उपसंख्यानं अवतनो
वतानः ॥१९ श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लिषश्वसश्च अनुपसर्गादिति निवृत्तं विभाषेति च श्
आकारांतेभ्यो व्यध आस्रु संस्रु अतीण अवसा अवहृ लिह श्लिष श्वस एतेभ्यश्च धातुभ्यो णः प्रत्ययो
भवति आकारांतत्वादेव सुप्युपसर्गे णप्रत्यये सिद्धे वचनं बाधकबाधनार्थं उपसर्गे कं बाधित्वा अयमेव भ
ति अवश्यायः प्रतिश्यायः आयः दायः धायः व्यधः व्याधः आस्रावः संस्रावः अत्यायः अवसायः अवहारः ले
ल श्लेषः श्वासः ॥२० दुन्योरनुपसर्गे दुनोतेर्नयतेश्चानुपसर्गाण्णः प्रत्ययो भवति दुनोतीति दावः नयतीति
नायः अनुपसर्गादिति किं प्रदवः प्रणयः ॥२१ विभाषा ग्रहः ग्रहेर्धातोर्विभाषा णः प्रत्ययो भवति अचोप
वादः ग्राहः ग्रहः व्यवस्थितविभाषेयं जलचरे ग्राह एव भवति ज्योतिषि ग्रह एव भवतीति वक्तव्यं भव
भावः ॥२२ गेहे कः ग्रहेर्धातोः कप्रत्ययो भवति गेहे कर्तरि गृहं वेश्म तात्स्थ्याद्दाराश्च गृहाणि गृहा
राः गृहं वेश्म ॥२३ शिल्पिनि ष्वुन् धातोः ष्वुन्प्रत्ययो भवति शिल्पिनि कर्तरि नृतिखनिरंजिभ्यः परिगणनं
नर्तकः खनकः रजकः नर्तकी खनकी रजकी रंजेरनुनासिकलोपश्च ॥२४ गस्थकन् गायतेस्थकन्

यो भवति ॥ शिल्पिनि कर्तरि गायकः ८५ ण्युट् च चकारेण गइत्यनुकृष्यते ण्युट् प्रत्ययो भवति गायतेः शि
ल्पिनि कर्तरि गायनः । गायनी योगविभाग उत्तरार्थः ८६ हश्च व्रीहिकालयोः । चकारेण ण्युडनुकृष्यते जहा
तेर्जिहीतेश्च ण्युट् प्रत्ययो भवति व्रीहौ कर्तरि काले च हायना नाम व्रीहयो भवन्ति जहात्युदकमिति कृ
त्वा काले हायनः संवत्सरः । जिहीते विभावानिति ८७ प्रुसृल्वः समभिहारे वुन् प्रुसृल्वः एतेभ्यो धातुभ्यः सम
भिहारे वुन् प्रत्ययो भवति प्रवकः सरकः लवकः समभिहारग्रहणेनात्र साधुकारित्वं लक्ष्यते साधुकारि
त्वविधानं सकृदपि यः सुष्ठु करोति तत्र भवति बहुशोऽपि यो दुष्टं करोति तत्र न भवति ८८ आशिषि च आशि
षि गम्यमानायां धातुमात्राद् वुन् प्रत्ययो भवति जीवतात् जीवकः । नन्दतात् नन्दकः । आशीः प्रार्थनाविशेषः ।
सेह क्रियाविषयः मनुष्यः । क्रियायां कर्ता भवत्वित्येवमाशास्यते ८९ इति काशिकायां वृत्तौ तृतीयाध्यायस्य प्र
मः पादः । कर्मण्यण् त्रिविधं कर्म निर्वर्त्यं विकार्यं प्राप्यं च सर्वत्र कर्मण्युपपदे धातोरण् प्रत्ययो भवति नि
र्वर्त्यं कुम्भकारो नगरकारः । विकार्यं काण्डलावः शरलावः । प्राप्यं वेदाध्यायः चर्चापारः । ग्रामं गच्छतीत्यादि
त्यं पश्यति हिमवन्तं शृणोति अनभिधानान्न भवति शीलिकामिभक्षाचरिभ्यो ण इति वक्तव्यं पूर्वपदप्रकृति
स्वरत्वं च मांसशीलः मांसशीला मांसकामः मांसकामा मांसभक्षः मांसभक्षा कल्याणाचारः कल्याणाचारा ईक्षिक्षमि
भ्यां चेति वक्तव्यं सुखप्रतीक्षः सुखप्रतीक्षा बहुक्षमः । बहुक्षमा । यदसज्जायते पूर्वं जन्मना यत्प्रकाशते
तन्निर्वर्त्यं विकार्यं च कर्म द्वेधा व्यवस्थितं १ प्रकृत्युच्छेदसंभूतं किञ्चित् काष्ठादि भस्मवत् । किञ्चिद्गुणान्त
रोत्पत्त्या सुवर्णादि विकारवत् २ क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते दर्शनादनुमानाद्वा
तत्प्राप्यमिति कथ्यते ३ ह्वावामश्च ह्वेञ् स्पर्धायां शब्दे च वेञ् तन्तुसन्ताने माङ् माने इत्येतेभ्यः कर्मण्युपपदेऽण् प्र
त्ययो भवति कप्रत्ययस्यापवादः । स्वर्गह्वायः । तन्तुवायः । धान्यमायः । ३ आतोऽनुपसर्गे कः आकारान्तेभ्यो धा
तुभ्योऽनुपसर्गेभ्यः कर्मण्युपपदे कप्रत्ययो भवति गोदः । धान्यदः । कम्बलदः । पार्ष्णित्रं अङ्गुलित्रं अनुप
सर्ग इति किं वडवासन्दायः । सुपि स्थः । सुपि उपपदे तिष्ठतेः कप्रत्ययो भवति समस्थः विषमस्थः
विषमस्थः । कूटस्थः । आत्र योगविभागः । क्रिय... का गाने भ्यो धातुभ्यः कप्रत्ययो भवति काम

वती तिथिपः पादपः कक्षपः समस्थः विषमस्थः तलस्थः स्वस्थसु विकावनस्य चो भवति किमर्थमिदं
कर्तरि पूर्वयोगः अनेन भावे यपः स्यात् गोविनो कृत्स्यानन्माविन्स्य वर्तते कृतमुच्यते कर्मणि सप
तिच दृश्यमधि क्रियते तत्र च स कर्मकेषु धातुषु कर्मणी स्येन कृयतिष्ठते अस्य च सुपीति ८ सुदक्षो क
यो पविस्तृता यनुयोनु दक्षो कयोः कर्मणो कृत्वदयोः पविस्तृतायो यनुयो धोन्योः कावत्य चो भवा
नुदयपविस्तृत आलेनो कायनुर्दा पुत्रो जातः आलस्य सुतो एकमा चोधितिवक्त्य कालेसत्त्व दयवि
ज उच्यते नुदयवि गाज एकान्तः सुखस्यारुतो कुणो कायनुदः कुणो कायनो ददनोन्यः कप्रकारयो वृतः
भुजादिभ्य उपसंख्यानं मूलानि विभुजतीति मूलविभुजो रथः नखमुचानि धनूंषि काकगुहास्तिल
को मोदने कुमुदं पयोदानः सोपसर्गो धेअरम्भः ददाते जोनातेश्चधातोः वे गोपस्य वुः नाकन्दे गिडवा
पादवाः युत्स्य चो भवति अगोपवादः सर्वधातुभ्यः प्रपञ्चयोः वहति किं गोसंदायः ८ समितयः सोपसर्ग
रम्भः सपूर्वायु ख्या कृत्ये तस्मात्प्रातः कर्मण्युपपदेक चकस्य चो भवति गोसंचरः गोसंख्यः पशुसंख्यः ७ ग
चोष्टक कर्मण्युपपदेनु मसकृति वर्तते गायते पिबतेश्च धातोः कर्मण्युपपदेनु पमसं देकुप्रत्ययो भवति
कस्यापवादः सामगः सोमपीथी पिबतेस्तिवक्त्यं सुरापो सीति सुरापा अनुपसर्गे कृत्ये वा चक्रसंग
यः वकुलछदसीति चक्रवर्ती यावाम्लणी सुरापी भवति नेतापेवा कृतिलोकान्तरिति यावो स्सणी सुरापा
वति नेतापेवाः यति लोकनयति ८ कर्मणोरनुष्टमने चुकर्मणे धोतोरनुष्टमनेच वर्तमानात् कर्मण्युपपद
दे चुप्रत्ययो भवति अणोपवादः उष्मसन्तमुन्दीपणा गंकरः कवचकरः अनुष्टमनयति किं भारकः अमु
प्रकमणो कृत्किलो गलो कुकूयाष्टि तो मसघूर्ध धनुष्घ यहेतुपसंख्यानं मुक्तिकरः लोगलग्रहः अ
कुशग्रहः यष्टिग्रहः तोमरग्रहः घटग्रहः घटीग्रहः धनुर्ग्रहः सूत्रेच धातोः सूत्रग्रहः सधारयति
न्ध र्थाः सूत्रग्रह एवान्यः ९ वयसि च हयमितिच गम्यमाने हरतेः धातोः कर्मण्युपपदे चे प्रत्ययो भवा
उष्मसमानार्थं अकमे कालकृतागृह्य विधि अस्थिहरः श्वाकवचहरः दायिय कुमोकः १० आङि ताच्छील्ये
अङ्ग कृ पुर्वो तहरतेः कर्मण्युपपदे च प्रत्ययो भवति ताच्छील्ये गम्यमाने ताच्छील्यं नकर्तुः आङि ता व
हरः पुष्पाद्याहरणे स्वाभाविकी फलानि... दानाहरणे, ताच्छील्यमिति किं भारमाहरति भारहारः

११ अर्हः । अर्हे पूजायामस्माद्धातोः कर्मण्युपपदे अच् प्रत्ययो भवति अणोऽपवादः । स्त्रियां विशेषः । पू
जार्हा ब्राह्मणी गंधार्हा माल्यार्हा १२ स्तंबकर्णयो रमिजपोः । स्तंबकर्णयोः सुबन्तयोरुपपद
योर्यथासंख्यं रमिजपोर्धात्वोरच् प्रत्ययो भवति स्तम्बेरमः कर्णेजपः शब्दः कर्मत्वात् न कर्मण्
से भवति हस्तिसूच्योरेतदभिमतं वक्तव्यं हस्तिसूचकयोरिति वक्तव्यं स्तम्बेरमो हस्ती कर्णे
जपतीति कर्णेजपः सूचकः । हस्तिसूचकयोरिति किं स्तम्बेरन्ता कर्णेजपिता १३ शमि धातोः संज्ञायां
शमि उपपदे धातुमात्रात् संज्ञायां विषये अच् प्रत्ययो भवति शंकरः शम्भवः शम्भवः धातुग्रहणं किं य
वञ्जाधातोरिति वर्तत एव शमि संज्ञायामिति सिद्धे धातोर्ग्रहणं कृञो हेत्वादिषु प्रतिषेधार्थं शंक
रा नाम परिव्राजिका शंकरा शकुनिका तच्छीलिका १४ अधिकरणे शेतेः । सुपीति सप्तम्यन्ते शेतेर्धातोरधिक
रणे सप्तम्यन्त उपपदे अच् प्रत्ययो भवति खे शेते खशयः । गर्तेशयः । पार्श्वादिषूपसंख्यानं पार्श्वाभ्यां शेते पार्श्व
शयः । उदरशयः । पृष्ठशयः । दिग्धसहपूर्वाच्च दिग्धेन सह शेते दिग्धसहशयः । उत्तानादिषु कर्तृषु उत्ता
नः शेते उत्तानशयः । पृष्ठशयः । एवमवमूर्धशयः । गिरौ डश्छन्दसि गिरिशः । १५ चरेष्टः । अधिकरण इति वर्तते
चरेर्धातोः सुबधिकरण उपपदे टः प्रत्ययो भवति कुरुषु चरतीति कुरुचरः । मद्रचरः । कुरुचरी मद्रचरी प्रत्यय
न्तरकरणं ङीबर्थं १६ भिक्षासेनादायेषु च अनधिकरणार्थ आरम्भः । भिक्षा सेना आदाय इत्येतेषूपपदेषु
चरेर्धातोः टः प्रत्ययो भवति भिक्षाचरः । सेनाचरः । आदायचरः । पुरोऽग्रतोऽग्रेषु सर्तेः । पुरस् अग्रतस् अग्रे
इत्येतेषूपपदेषु सर्तेर्धातोष्टः प्रत्ययो भवति पुरः सरतीति पुरःसरः । अग्रतःसरः । अग्रेसरः । १८ पूर्वे
कर्तरि पूर्वशब्दे कर्तृवाचिनि उपपदे सर्तेर्धातोष्टः प्रत्ययो भवति पूर्वः सरतीति पूर्वसरः । कर्तरीति किं
पूर्वं सरतीति पूर्वसारः १९ कृञो हेतुताच्छील्यानुलोम्येषु कर्मणीति वर्तते कर्मण्युपपदे कृञो हेतुषु । प्रत्यय
भवति हेतौ ताच्छील्यानुलोम्येषु कर्मणीति वर्तते कर्मण्युपपदे कृञो हेतुषु । प्रत्ययो भवति हेतौ ताच्छ
शोकम आनुलोम्ये च हेतौ कर्मणि ताच्छील्ये भावकरः आनुलोम्य मन्त्रकर

हेतौ तावानू कन्या नौक कर्त्री विद्याय श्लोकरी माछी स्तोत्र यकरः गर्थकरः अनुलोमेत्रेषु क
चेतनकरः एतेष्विति किं कुंभकारः शब्दकारः २१ दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दी
का किंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु कर्मणि इति सर्वमि
० च इत्यस्मिन्ननुवर्तते तत्र यथायोगं संबंधः दिवादिषूपपदेषु करोतेर्धातोः टः प्रत्ययो भवति
अहेत्वाद्यर्थ आरंभः दिवाशब्दोधिकरणवाची सर्वत्र सप्तविभक्तेरो दिवा करोतीति प्राणिन इवोत्था
पनमिति दिवाकरः विभां करोतीति विभाकरः प्रभाकरः भास्करः सकारस्येति पातनाजू विसर्जन
याजिह्वामूलीयो न भवन्ति कारकरः अंतकरः अनंतकरः आदिकरः बहुकरः नांदीकरः किंकरः लि
पिकरः लिबिकरः बलिकरः भक्तिकरः कर्तृकरः चित्रकारः क्षेत्रकारः संख्या एककरः द्विकरः जंघाक
रः बाहुकरः अहस्करः यत्करः चित्रेकारः क्षेत्रकारः संख्या एककारः द्विकारः जंघाकारः बाहुकारः भ
रः यत्कारः धनुष्करः अरुष्करः किंयत्तद्बहुषु कृञोऽज्विधानं किंकरा यत्करा तत्करा बहुकरा अथवा
जादिषु पाठः करिष्यते २२ कर्मणि भृतौ कर्मणीति स्वरूपग्रहणं कर्मण्युपपदे कर्मवाचिनि करोते
र्धातोः टः प्रत्ययो भवति भृतौ गम्यमानायां भृतिर्वेतनं कर्म निर्वेशः कर्म करोतीति कर्मकरो भृतकः
ता भृतौ इति किं कर्मकारः २३ नशब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु शब्दश्लोककलहगा
थावैरचाटुसूत्रमन्त्रपद इत्येतेषूपपदेषु कृञो टः प्रत्ययो न भवति हेत्वादिषु प्राप्तः प्रतिषिध्य
ते शब्दकारः श्लोककारः कलहकारः गाथाकारः वैरकारः चाटुकारः सूत्रकारः मन्त्रकारः पदकारः
स्तम्बशकृतोरिन् स्तम्बशकृतोरुपपदयोः कर्मणि उपपदयोः करोतेरिन्प्रत्ययो भवति किं स्तम्बकारः शकृत्का
रः २५ हरतेर्दृतिनाथयोः पशौ दृतिनाथयोः कर्मणोरुपपदयोर्हरतेर्धातोः पशौ कर्तरि इन् प्रत्य
यो भवति दृतिं हरतीति दृतिहरिः पशुः नाथहरिः पशुः पशाविति किं दृतिहारः नाथहारः २६ फलेग्रहि
रात्मंभरिश्च फलेग्रहिः आत्मंभरिः इत्येतौ [illegible] उपपदयोः [illegible]
निपात्येते फलानि गृह्णातीति फलेग्रहिर्वृक्षः उपपद [illegible] आत्मानं बिभर्तीति आत्मंभरि

भरिः । आत्मनुक्तसमुच्चयार्थश्चकारः । कुक्षिंभरिः ॥ २६ छंदसि वनसनरक्षिमथां । वन षण संभक्तौ रक्ष पालने मथि विलो-
डने एतेभ्यो धातुभ्यः कर्मण्युपपदे छंदसि विषये इन्प्रत्ययो भवति ब्रह्मवनिं त्वा क्षत्रवनिं त्वा गोसनिं । यो पथिरक्षी श्वो-
हविर्मथीनां ॥ २७ एजेः खश् । एजेर्ण्यंतात् कर्मण्युपपदे खश्प्रत्ययो भवति खकारो मुमर्थः । शकारः
सार्वधातुकार्थः । अंगमेजयति अंगमेजयः । खश्प्रकरणे वातशुनीतिलशर्धेषु अजधेट्तुदजहातिभ्य-
श्च उपसंख्यानं वातमजा मृगाः । शुनिंधयः । तिलंतुदः । शर्धंजहा माषाः ॥ २८ नासिकास्तनयोर्ध्माधेटोः । नासिकास्तनयोः
कर्मणोरुपपदयोर्ध्माधेटोर्धात्वोः खश्प्रत्ययो भवति यथासंख्यं नाश्रीयते धेटः । स्तनंधयः । नासिकांधयः । नासिकांधु-
श्च धेटश्च नासिकंधमः । नासिकंधयः । स्तनयोर्नासिकायां च ... लक्षणव्यभिचारचिह्नं कुर्यात् ... पूर्व-
पातात् ... ॥ २९ नाडीमुष्ट्योश्च । नाडीमुष्टि इत्येतयोः कर्मणोरुपप-
दयोर्ध्माधेटोर्धात्वोः खश्प्रत्ययो भवति अत्रापि यथासंख्यं पूर्ववत् ... नाडिंधमः । ना-
डिंधयः । मुष्टिंधमः । मुष्टिंधयः । अनुक्तसमुच्चयार्थश्चकारः । घटिंधयः । घटिंधमः । खरिंधयः । खरिंधमः । वातंधमः ।
वातंधयः । पर्वतंधमः ॥ ३० उदि कूले रुजिवहोः । उत्पूर्वाभ्यां रुजिवहिभ्यां कूले कर्मण्युपपदे खश्प्रत्ययो
भवति कूलमुद्रुजति कूलमुद्रुजः । कूलमुद्वहः ॥ ३१ वहाभ्रे लिहः । वहाभ्र इत्येतयोः कर्मणोरुपपदयोर्लिहे-
र्धातोः खश्प्रत्ययो भवति वहंलिहो गौः । अभ्रंलिहो वायुः ॥ ३२ परिमाणे पचः । परिमाणं प्रस्थादि तस्मिन्नु-
पदे कर्मणि पचेर्धातोः खश्प्रत्ययो भवति प्रस्थं पचति प्रस्थंपचा स्थाली । द्रोणंपचः । कटाहः ॥ ३३ मितनखे
च । मितनख इत्येतयोः कर्मणोरुपपदयोः पचेर्धातोः खश्प्रत्ययो भवति अपरिमाणार्थ आरंभः । मितं-
पचा ब्राह्मणी नखंपचा यवागूः ॥ ३४ विध्वरुषोस्तुदः । विधु अरुष् इत्येतयोः कर्मणोरुपपदयोस्तुदेर्धातोः खश्प्रत्य-
यो भवति विधुंतुदः । अरुंतुदः ॥ ३५ असूर्यललाटयोर्दृशितपोः । असूर्य-
ललाटयोः कर्मणोरुपपदयोर्यथासंख्यं दृशितपोर्धात्वोः खश्प्रत्ययो भवति असूर्यंपश्या राजदाराः
सूर्यमपि न पश्यन्ति । असूर्यमिति चासमर्थसमासोयं दृशिना नञः । सर्वथा न सूर्यं पश्यन्तीति गुप्तिपरं
ललाटंतपः आदित्यः ॥ ३६ उग्रंपश्येरंमदपाणिंधमाश्च । उग्रंपश्य
इरंमद पाणिंधम इत्येते निपात्यन्ते उग्रं पश्यतीति उग्रंपश्यः । इरया माद्यतीति इरंमदः । पाणयो ध्मायन्ते
इरंमद पाणिंधमाः पंथानः ॥ ३७ प्रियवशे वदः खच् । प्रियवश इत्येतयोः कर्मणोरुपपदयोर्वदेर्धातोः
एषोयेति पाणि

चप्रत्ययो भवति । प्रियंवदः । वशंवदः । चकारः खचि कृतः । द्वितीयान्तेभ्यो [illegible] खकारो मुमर्थः । प्रत्य-
या नरकंगच्छति नरकंगमः । खच प्रकरणे गमे । सुप्युपसंख्यानम् । मितं गच्छतीति मितंगमो हस्ती मितंगमा हस्तिनी
का । विहायसो विह । विहायसा गच्छतीति विहंगमः । खच्च डिद्वा वक्तव्यः । विहगः । डे च विहायसो विहा-
देशो वक्तव्यः । विहंगः । ४७ द्विषत्परयोस्तापेः । द्विषत्परयोः कर्मणोरुपपदयोस्तापेर्धातो
खच प्रत्ययो भवति तपधातोर्ण्यन्तादि । तत्र सन्तापे भुवादि [illegible] यो मिति ह्रस्वः कारो निर्देशा-
न्नास्ति यामभवति । द्विषन्तं तापयतीति द्विषन्तपः । परंतपः । [illegible] मो वृत्तौ वाक्ये दिक्कर्मको-
निरूपपदे चमेर्धातोः खच प्रत्ययो भवति वाचंयम [illegible] व्रतमिति । आसु नियम-
नाचं यमः । आसते व्रतमिति किं वाग्यामः । ४० पुः सर्व [illegible] सहोः । पुर सर्व इत्येतयोः
कर्मणोरुपपदयोः दारिसहोर्धात्वोः खच प्रत्ययो भवति [illegible] पुरन्दारयतीति पुरन्दरः । स-
र्वसहः । भगे च दारेरिति वक्तव्यम् भगन्दरः । ४८ सर्वकूलाभ्रकरीषेषु कषः । सर्वकूलाभ्रकरीषे
षु कर्मसूपपदेषु कषतेर्धातोः खच प्रत्ययो भवति सर्वंकषः । खलः । कूलंकषा नदी । अभ्रंक-
षो गिरिः । करीषंकषः । मेघर्तिभयेषु कृञः । मेघंकरः । ऋतिंकरः । भयंकरः । उपपदग्रहणं भयाद्यादि तदन्त-
विधिप्रयोजनार्थम् । अभयंकरः । ४९ क्षेमप्रियमद्रेऽण्च । क्षेम प्रिय मद्र इत्येतेषु कर्मसूपपदेषु
करोतेर्धातोः अण्प्रत्ययो भवति चकारात्खच्च । क्षेमंकरः । प्रियंकरः । प्रियकारः । मद्रकारः । मद्रंक-
रो वेति वक्तव्यम् । राजन् [illegible] इत्यादि पठितः ४४ आशिते भुवः करणभावयोः । आशितशब्द उप-
पदे आशितं सूपदे भवतेर्धातोः करणे भावे चार्थे खच प्रत्ययो भवति आशितो भवन्ति
अनेन आशितंभवोदनः । भावे आशितस्य भवनं आशितंभवं वर्तते । ४५ संज्ञायां भृतॄवृजिधारिसहितपि-
दमः । कर्मणि सुपीति वर्तते । पूर्वत्र संज्ञाग्रहणानुवृत्त्या समर्थे संबध्यते भृतॄवृजिधारिसहितपिदम इत्ये-
भ्यो धातुभ्यो संज्ञायां विषये खच प्रत्ययो भवति विश्वंभरा वसुधा [illegible] गमयति रथं तरं साम [illegible]
न्ता । शत्रुंजयो हस्ती । युगंधरः पर्वतः । शत्रुंसहः । शत्रुंतपः । अरिंदमः । संज्ञायामिति किं कुटुम्बं बिभ-

कपालभारः ४६ गमश्च गमेर्धातोः सुप्युपपदे संज्ञायां विषये खच्प्रत्ययो भवति सुतंगमो नाम यस्य सौतं-
गमिः पुत्रः योगविभाग उत्तरार्थः ४७ अंतात्यंताध्वदूरपारसर्वानंतेषु डः संज्ञामिति नानुवर्त्त-
ते अंत अत्यंत अध्वन् दूर पार सर्व अनंत इत्येतेषु कर्मसूपपदेषु गमेर्धातोर्डप्रत्ययो भवति अं-
तं गच्छतीति अंतगः अत्यंतगः अध्वगः दूरगः पारगः सर्वगः अनंतगः डकारष्टेर्लोपार्थः डित्यभ-
स्यापि अनुबंधकरणसामर्थ्यादिति डप्रकरणे सर्वत्रपन्नयोरुपसंख्यानं सर्वत्रगः पन्नगः उरसो लोप-
श्च उरसा गच्छतीति उरगः सुदुरोरधिकरणे सुखेन गच्छति अस्मिन्निति सुगः दुर्गः निरो देशे निर्गो दे-
शः अपर आह डप्रकरणेऽन्यत्रापि दृश्यत इति स्त्र्यगारगः ग्रामगः गुरुतल्पगः ४८ आशिषि हनः डा
इति वर्त्तते आशिषि गम्यमानायां हंतेर्धातोः कर्मण्युपपदे डप्रत्ययो भवति तिमिं वध्यात् तिमि-
हः शत्रुहः ४९ दारावाहनोऽणंतस्य च टः संज्ञायां दारावुपपदे आङ्पूर्वाद्धंतेर्धातोरण्प्रत्ययो भवति
अंतस्य च टकार आदेशो भवति संज्ञायां विषये दारावाघाटः चारौ वा चारावुपपदे हंतेरण्प्रत्य-
स्य च टकारः चारौघाटः चारौघातः कर्मणि समि च कर्मण्युपपदे सम्पूर्वस्य हंतेरण्प्रत्ययो
भवति अंतस्य च टकारो वा भवति वर्णसंघाटः वर्णसंघातः पदसंघाटः ५० अपात्क्लेशतम-
सोः अपपूर्वाद्धंतेः क्लेशतमसोः कर्मणोरुपपदयोर्डप्रत्ययो भवति क्लेशापहः पुत्रः
तमोपहः सूर्यः ५१ कुमारशीर्षयोर्णिनिः कुमारशीर्षयोः कर्मणोरुपपदयोर्हंतेर्णिनिः प्रत्ययो
भवति कुमारघाती शीर्षघाती कर्मणि उपपदे लक्षणवति कर्त-
रि भावे ५२ लक्षणे जायापत्योष्टक् हंतेर्धातोर्जायापत्योः कर्मणोरुपपदयोर्लक्षणवति कर्त्तरि टक्प्रत्ययः
जायाघ्नो ब्राह्मणः पतिघ्नी वृषली अयं वा लक्षणे टक्प्रत्ययः ५३ अमनुष्यकर्तृके च हंतेर्धातोः कर्मण्युपपदे टक्प्रत्ययो
भवति अमनुष्यकर्तृके वर्त्तमानात् हंतेः कर्मण्युपपदे टक्प्रत्ययो भवति अमनुष्यकर्तृके
जायाघ्नस्तिलकालकः पतिघ्नी पाणिरेखा श्लेष्मघ्नं मधु पित्तघ्नं घृतम् अमनुष्यकर्तृक इति
किं आखुघातः शूद्रः इह कस्मान्न भवति चौरघातो हस्ती कृत्यल्युटो बहुलमिति

बहुलवचनात्प्रभाविष्णुरिति ॥ ४४ ॥ शक्तौ हस्तिकपाटयोः । शक्तौ गम्यमानायां हस्तिकपाटयो
कर्मणोरुपपदयोर्हन्तेर्धातोष्टक् प्रत्ययो भवति मनुष्यकर्तृकार्यमिदम् । हस्तिनं
का हन्तुं शक्तः हस्तिघ्नो मनुष्यः । कपाटघ्नः । शक्ताविति किं विषेण हस्तिनं हन्ति हस्तिघातः ।
त्रि ॥ ४५ ॥ पाणिघताडघौ शिल्पिनि । पाणिघताडघ इत्येतौ शब्दौ निपात्येते । शिल्पिनि कर्तरि वा
च्ये पाणिघः । ताडघः । शिल्पिनीति किं पाणिघातः । ताडघातः । राजघ उपसंख्यानं राजानं हन्ती
ऐ ति राजघः ॥ ४६ ॥ आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः ख्युन् ।
आढ्यादिषु कर्मसूपपदेषु च्व्यर्थेषु अच्व्यन्तेषु करोतेर्धातोः करणे कारके ख्युन् प्रत्ययो भव
ति च्वेर्विकल्पेन विधानान्नञुद्दिष्टविधा । च्व्यर्थो । आढ्यापय । अच्वौ ता । अच्व्यन्तास्ततश्च्वेनता ।
पर्युदस्यते । अनाढ्यमाढ्यं कुर्वन्त्यनेन आढ्यंकरणं सुभगंकरणं स्थूलंकरणं पलितंकरणं
नग्नंकरणं अन्धंकरणं प्रियंकरणं । च्व्यर्थेष्विति किं आढ्यं तैलेन करोति अभ्यञ्जयतीत्यर्थः । अच्व
न्तेरूविवचा याचप्यूनः क्वापि चित्रपुत्र्या करणं अच्वाविति किं आढ्यीकुर्वन्त्यनेन ननु च ख्युना
मुक्तो पक्षे ल्युट् न च भविता न च ल्युट् ख्युनश्चाविशेषोऽस्ति तत्र किं ख्यातिबोधनं एवं तर्हि वृति
बोधसामर्थ्यान्नाल्युट् ल्युट्यस्मिन् भवति तेन ल्युटो विषय एव समर्थनं । प्रतिबोधः उत्तरत्र
प्रतिषेधः ॥ ४७ ॥ कर्तरि भुवः खिष्णुच्खुकञौ । आढ्यादिषु सर्वतेषु च्व्यर्थेषूपपदेषु भवते
र्धातोः कर्तरि कारके खिष्णुच्खुकञौ प्रत्ययौ भवतः । आढ्यंभविष्णुः । आढ्यंभावुकः ।
सुभगंभविष्णुः । सुभगंभावुकः । स्थूलंभविष्णुः । स्थूलंभावुकः । पलितंभविष्णुः पलितंभा
वुकः । नग्नंभविष्णुः नग्नंभावुकः । अन्धंभविष्णुः । अन्धंभावुकः । प्रियंभविष्णुः । प्रियंभावुकः । क
र्तरीति किं करणे मा भूत् । च्व्यर्थेष्वित्येव आढ्यो भविता अच्वाविति किं आढ्यीभविता वा उदात्तत्वात् भुवः इ
ट् मिकारादित्वमिति लुचः । नत्वल्लु स्वरार्थोऽसि ... कारादित्वमित्यप्यते ॥ ४८ ॥ स्पृशोऽनुदके क्विन् । स्पृशो धातो
रनुदके सुवन्त उपपदे क्विन् प्रत्ययो भवति नलसकर्मत्वान्नु स्पृशः । कर्मोपपदं प्राप्नोति नैव

लेषु कर्त्तरीति पूर्वस्
पदे कान्ते प्रत्ययो लभ्य
अनुपक इति किं उदक
कृ स्रगादि गुलिनं चुयु
को निर्दिं भुवते अनु
जति अप्रयुक्तो यज
अर्त्तो पात्तच निपा
स्त्वकृ दिष्टे; कर्मणि कि
त्ययो भवति निपात
न मात्रे उपपदे किन्नु
न्नं; सोपसर्गात् सत्त्
ते; कुन्दुः कुञ्चौ कुञ्च
द्रे धातो न नालोचने व
यादृक्कु यादृशः कर्त्तो
दृशौ; तादृशाद्यो
सदृशः; अन्यादृक्कुन
दुक तुक युजाविद
दुशि कि न्निरूपत्तः प्रभृति
के कि पूर्वात्प्रत्ययो भव
स्त्यति ... पासादच
योरपिने ... णाविपे

आत्र अनुवर्त्तिष्यते ननु कान्ते प्रत्यये विज्ञास्यते सुवन्त मात्रे चोप
ते घृतं स्पृशतीति घृतस्पृक् मन्त्रेण स्पृशतीति मन्त्रस्पृक् जलस्पृक्
स्पृशौ; नकारः किं न प्रत्ययस्य कुरिति विशेषणार्थः; ५५ ऋत्विग्दधृ
ज्स्रग्दिगुष्णिगञ्च; ऋत्विगादयः; पंचशब्दानि पात्यन्ते यथैतत् एव धातु
ग्रा कउपपदे यजे धातोः किन्नु प्रत्ययो भवति ऋतौ यजति ऋतुं वाय
ति ऋत्विक् ऋत्विजौ यथा कथंचिदनुगन्तव्या धृषेः किन्नु द्विर्वचनं
त्य ते दधृक् सृजेः कर्मणि किन्नु अमागमश्च निपात्यते सृजति मामिति
न्न प्रत्ययो निपात्यते उष्णिक् अञ्चु युजि क्रुंचां इत्येतेषां तेनाः किन्नु
ने; सह निर्देशात् अत्रापि किंचित् पलादानि कात्यमाति अचं ते; सुव
प्र त्ययो भवति प्राङ् प्रत्यङ् दध्यङ् युजेः केवलादेव युङ् युञ्जौ यु
द्वि युङ्क्ष्व युङ्क्ष्वयुजेति किं पूर्वमवेति अश्वयुक् अश्वयुजौ अश्वयुजः; ते
न लोपो न भवति निपातनसामर्थ्यात् ६० त्यदादिषु दृशोऽनालोचने कञ्च दृ
त्मा शानु त्यदादिषु पूर्वपदेषु कञ्प्रत्ययो भवति चकाराः किप्च तादृक् तादृशौ;
त्का मोविपूर्वकार्थः; दृष्ट्वा मूकात्विति अनालोचन इति किं तं पश्यति त
सूति ज्ञानेवात्र दृशेर्न किं यावितेन समानान्ययोश्चेति वक्तव्यं सदृक्
न्या दृक्; कस्माद्वक्तव्यं; तादृक्; यादृक्; ईदृक्; कीदृक्; ६१ सत्सूद्विष
मिद च्छिद जिनी राजामुपसर्गे किप् सुपीति वर्त्तते कर्मग्रहणं तु स्पृशोऽनुद
ति न व्याप्रियते सदादिभ्यो धातुभ्यः सुवन्त उपपदे उपसर्गे चानुपसर्गे चि
उ पसर्गे ग्रहणं ज्ञापनार्थं अन्यत्र सुपि ग्रहणं न भवति वदः सुपि क्यप्चेति
च यानु सूत्रे तदादिकस्य ग्रहणं न सुवन्ते; युजिर्योगे युज समाधौ दि
ज्ञा ने विदविचारणे विद सत्तायामिति त्रयाणां ग्रहणं न लोमार्थ सं ग

कारस्य विकारादेशत्वात्। सद् शुचिषत्। अन्तरिक्षसत्। उपसत्। सू अण्डसूः। प्रसूः। द्विष्
मित्रद्विट्। प्रद्विट्। द्रुह मित्रध्रुक्। प्रध्रुक्। दुह गोधुक्। प्रधुक्। युज युक्। अश्वयुक्। प्रयुक्। विद वेदवि-
त्। प्रवित्। भिद काष्ठभित्। प्रभित्। छिद रज्जुच्छित्। प्रच्छित्। जि शत्रुजित्। प्रजित्। नी सेनानीः।
का प्रणीः। अग्रणीः। ग्रामणीः। कथमत्र णत्वं स एव ग्रामणीमिति ग्रापकान् नयने। पूर्वपदात्
ग्रि संज्ञायामपि णत्वं भवतीति। राज। विराट्। सम्राट्। क्विप्। अन्येभ्योऽपि दृश्यते इति सामा-
का न्येन वदपत्तिनस्यैवायं प्रपंचः॥ ६२ भजो ण्विः। उपसर्गेऽपीति वर्तते। भजतेर्धातोः। सुबन्त उ-
पपदे ण्विः प्रत्ययो भवति। अर्धं भजते अर्धभाक्। पादभाक्। तुर्यभाक्। उपसर्गेऽपि प्रभजते प्र-
६५ भाक्॥ ६३ छन्दसि सहः। उपसर्गे सुपीत्येव छन्दसि विषये सहेर्धातोः ण्विः प्रत्ययो भवति। पृत-
नाषाट्॥ ६४ वहश्च। छन्दसि विषये वहेश्च धातोः ण्विः प्रत्ययो भवति। प्रष्ठवाट्। दित्यवाट्।
६४ वहश्च। छन्दसि विषये वहेश्च धातोर्ण्विः प्रत्ययो भवति। प्रष्ठवाट्। दित्यवाट्। योगवि-
भाग उत्तरार्थः॥ ६५ कव्यपुरीषपुरीष्येषु ञ्युट्। कव्यपुरीषपुरीष्येषु छन्दसि विषये वहे-
र्धातोर्ञ्युट् प्रत्ययो भवति। कव्यवाहनः। पितॄणां। पुरीषवाहनः। पुरीष्यवाहनः॥ ६६ हव्ये-
ऽनन्तःपादं। हव्यशब्द उपपदे छन्दसि विषये वहेर्धातोर्ञ्युट् प्रत्ययो भवति। अनन्तःपादं
चेत्। वहिर्वर्तते। अग्निश्च हव्यवाहनः। अनन्तःपादमिति किं। हव्यवाडग्निरजरः पिता नः।
६७ जनसनखनक्रमगमो विट्। छन्दसीत्युपसर्गे सुपीति किं अनुवर्तते। जन जनने। जनी प्रादु-
र्भावे। षणु दाने। वन षण संभक्तौ। इति जनादिभ्यो धातुभ्यः छन्दसि वि-
ट् प्रत्ययो भवति। टकारः। सामान्यग्रहणाविघातार्थः। वेरपृक्तस्येति विलोपः। षणाद्यस्य वि-
ड्वनोरनुनासिकस्यात्। अब्जाः। गोजाः। गोषाः। इन्द्रो वृषभजाः। बिसखाः। कूपखाः। क्रमु प-
धिक्राः। गम अग्रेगाः। ६८ अदोऽनन्ने। छन्दसीति निवृत्तं अदेर्धातोरनन्ने सुप्यु-
पपदे विट् प्रत्ययो भवति। क्रव्यात्। [illegible] वचनमसरूपबाधनार्थं तेन [illegible] आमात्

भवति कथं तर्हि क्रव्यादः कृत्ताविकृत्तशब्दे उपपदे अण् न स्यात् पृषोदरादित्वात् आममत्ति
आमात् सस्यात् अन्नाद इति किं अन्नादः ६८ क्रव्ये च क्रव्यशब्दे उपपदे अदेर्धातो
र्विट् प्रत्ययो भवति क्रव्यादः कृत्तविकृत्तपक्वमांसभक्षः क्रव्यादप्युच्यते आममां
सभक्षः क्रव्यादिति ६९ दुहः कप् घश्च दुहेर्धातोः सुप्युपपदे कप् प्रत्ययो भवति घ
कारश्चान्तादेशः कामदुघा धेनुः कामदुघा ७० मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्वि
न् श्वेतवह उक्थशस् पुरोडाश् इत्येतेभ्यो ण्विन् प्रत्ययो भवति मन्त्रविषये धातू
पपदसमुदाया एव निपात्यन्ते गत्वादाणिककार्यसिद्ध्यर्थं प्रत्ययस्तु विधीयते
एव श्वेतशब्दे कर्तृवाचिन्युपपदे वहेर्धातोः कर्मणि कारके ण्विन् प्रत्ययो भव
ति श्वेता एनं वहन्ति श्वेतवाः इन्द्रः उक्थशब्दे कर्मणि करणे वा उपपदे शंसते
र्ण्विन् प्रत्ययो भवति नलोपश्च उक्थानि उक्थैर्वा शंसति उक्थशाः यजमानः दाशृ दाने
इत्यस्य पुरस्पूर्वस्य उपपदे कर्मणि च वक्तव्यः पुरो दाशन्त एनं इति पुरोडाशः श्वेत
वाहादीनां पदस्येति वक्तव्यं श्वेतवोभ्याम् श्वेतवोभिः पदस्येति किं श्वेतवाहौ श्वे
तवाहः ७१ अवे यजः अवे उपपदे यजेर्धातोः ण्विन् प्रत्ययो भवति मन्त्रे त्वं यज्ञे वरु
णस्यावया असि योगविभाग उत्तरार्थः ७२ विजुपे छन्दसि उपे उपपदे यजेर्धातोः छन्दसि
विषये विच् प्रत्ययो भवति उपयजो दूर्ध्वं यजन्ति तदुपयजामुपयट्त्वं छन्दोग्रहणं ब्राह्म
णार्थं चित्करणं सामान्यग्रहणाविघातार्थं वेरपृक्तस्येति किमर्थमिदमुच्यते या
वतान्येभ्यो विधीयन्ते इति यजेरपि विधीयत इति नियमार्थमेतत् उपे यजः छन्दस्येव न
भाषायामिति ७३ आतो मनिन्क्वनिब्वनिपश्च छन्दसीति निवृत्तं सुप्युपसर्गे चेति च
आकारान्तेभ्यो धातुभ्यः छन्दसि विषये मनिन् क्वनिप् वनिप् इत्येते प्रत्यया भवन्ति चकारा

रादिवृ सुदामा अश्वत्थामा क्वनिपू सुधीवा। सुपीवा सुपीवा वानिपू भूरिदावा घृतपा
वा विच खल्वपि कीलालपाः शुभंयाः अयस्वोबदाः ७४ अन्येभ्योऽपि दृश्यन्ते छंदसी
का तिनिवृत्ते अन्येभ्यो धातुभ्यो नाकारांतेभ्यो मनिपू क्वनिपू वनिपू वनिपू इत्येते
त्रि प्रत्यया भवंति मनिच्च सुशर्मा क्वनिपू प्रातरित्वा प्रातरित्वानः वनिपु वि
जावा अग्रेगावा विचू खल्वपि रेडसि पर्णं नावः ऽपि गावः समर्थविधि व्यभिचारा
७६ र्थः निरुपपदादपि भवति धीवा पीवा दृशिग्रहणं प्रयोगानुसारार्थं ७५ क्विप्च सर्व
धातुभ्यो सोपपदेभ्यो निरुपपदेभ्यश्छंदसि विभाषायां च क्विपू प्रत्ययो भवति उखायाः
८६ स्रंसते उखास्रत् पर्णध्वत् वाहाभ्रट् ७६ स्थः क च सुप्युपसर्गेपि इतिव
र्तते स्थः इत्येतस्माद्धातोः सुप्युपपदे कः प्रत्ययो भवति क्विप्च किमर्थमिदं यावतासुपि
स्थ इति कः सिद्धः अन्येभ्योऽपि दृश्यन्ते इति क्विपू बाधकबाधनार्थं पुनर्वचनं शमिधा
तोः संज्ञायामिति निगमे च बाधते शंस्थः शंस्थाः ७७ सुप्यजातौ णिनिस्ताच्छील्ये अजातिवा
चिनि सुबंते उपपदे ताच्छील्ये गम्यमाने धातोः णिनि प्रत्ययो भवति उष्णभोजी अजाता
विति किं ब्राह्मणान् आमंत्रयिता ताच्छील्य इति किं उष्णं भुंक्ते कदाचित्। सुपीति वर्तमा
ने पुनः सुप्ग्रहणं उपसर्गनिवृत्त्यर्थं उत्प्रतिभ्यामाङि सर्त्तेरुपसंख्यानं उदासारिण्यः
प्रत्यासारिण्यः साधौ कारिणि च साधुकारी साधुदायी ब्रह्मणि वदः ब्रह्मवादिनो वदंति
७८ कर्तर्युपमाने कर्तृवाचिनि उपमाने उपपदे धातोः णिनिः प्रत्ययो भवति उपपदकर्तृ
प्रत्ययार्थस्य कर्तुरुपमानं उष्ट्र इव क्रोशति उष्ट्रक्रोशी ध्वांक्षविरावी अताच्छील्यार्थ आरं
मः जात्यर्थोऽयमकर्त्तरीति किं अपूपानिव भक्षयति माषान् उपमानादिति किं उष्ट्रः क्रोशति
७९ व्रते व्रत इति शास्त्रतो नियम उच्यते व्रते गम्यमाने सुबंते उपपदे धातोः णिनि प्र

त्ययो भवति समुदायोपाधिश्चायं धातूपपदसमुदायेन चेत् व्रतं गम्यत इ
ति स्थंडिलशायी अश्राद्धभोजी कामचारप्राप्तौ नियमः। सति शयने स्थंडिल एव
शेते नान्यत्र सति भोजने अश्राद्धमेव भुङ्क्ते न श्राद्धमिति व्रतमिति किं स्थंडिले शेते
देवदत्तः। असाद्धीत्याद्यं अश्राद्धभोजी नञ्योगो वा ॥ ७९ बहुलमाभीक्ष्ण्ये। आभीक्ष्ण्ये गम्यमा
ने सुबन्त उपपदे धातोर्बहुलं णिनिः प्रत्ययो भवति आभीक्ष्ण्यं पौनःपुन्यं तात्पर्यं
मासेवा ताच्छील्यादन्यत् कषायपायिनो गान्धाराः। क्षीरपायिण उशीनराः। सौवीरपायि
णो वाह्लिकाः। बहुलग्रहणान्न कुल्माषखादाः। कुम्भत्र न स्यात् ॥ ८१ मनः। सुपीति वर्त्तते म
न्यतेर्धातोः सुबन्त उपपदे णिनिः प्रत्ययो भवति दर्शनीयमानी शोभनमानी बहुलग्र
हणानुवृत्तेर्मन्यतेर्ग्रहणं आत्मनो मननं आत्ममानं। आत्ममाने वर्त्तमानात् मन्यतेः सु
बन्ते उपपदे खश् प्रत्ययो भवति चकारात् णिनिश्चायपदाप्रत्ययार्थे। कर्मत्वमात्मानमे
व दर्शनीयत्वादिना गुणेन युक्तं मन्यते तदायं विधिः। दर्शनीयमात्मानं मन्यते दर्शनीयं
मन्यः। दर्शनीयमानी पंडितंमन्यः। पंडितमानी आत्ममाने इति किं दर्शनीयमानी देवदत्तो
यज्ञदत्तस्य ॥ ८३ भूते भूत इत्यधिकारो वर्त्तमाने लडिति यावत् यदित ऊर्ध्वमनुक्रमिष्या
मो वर्त्तमाने लडिति यावत् भूते तद्वेदितव्यं धात्वधिकारश्चोर्ध्वार्थं भूत इति विज्ञाय
ते ॥ ८४ करणे यजः। अग्निष्टोमेनेष्टवान् अग्निष्टोमयाजी भूत इति किं अग्निष्टोमे
न यजति ॥ ८५ करणे यजः। णिनिरनुवर्त्तते नावधूय यजेर्धातोः करण उपपदे णिनिः प्रत्ययो
भवति भूते अग्निष्टोमयाजी वाजपेययाजी। अग्निष्टोमः फलभावनायां करणं भव
ति ॥ ८६ कर्मणि हनः। कर्मण्युपपदे हन्तेर्धातोर्णिनिः प्रत्ययो भवति भूते पितृव्यघाती
मातुलघाती कुत्सिते ग्रहणं कर्तव्यं इह मा भूत् चौरं हतवान् ॥ ८७ ब्रह्मभ्रूणवृत्रेषु
क्विप्। कर्मणीति वर्त्तते ब्रह्मादिषु कर्मसूपपदेषु हन्तेर्धातोः किं क्विप् प्रत्ययो भवति ब्र
ह्महा वृत्रहा किमर्थमिदमुच्यते [illegible] धातोर्भूत्। किं चिह्नित एव प्रत्ययादि

त्र कर्मकृते। किंच चार्थं नियमार्थं च। चतुर्विधश्चात्र नियम इष्यते ब्रह्मादिष्वेव हन्तेर्नान्यस्मि-
न्नुपपदे। पुरुषहतवानिति। ब्रह्मादिषु हन्तेरेव नान्यस्मात्। ब्रह्माधीतवानिति। ब्रह्मादि-
क षु हन्तेर्भूते। किं वेवं नान्यः प्रत्ययः। तस्माद्भूत एव नान्यस्मिन्काले। ब्रह्माणं हन्ति हनि-
शि ष्यति चेति। तदेतच्चतुष्टयमाणस्य कृतमप्रकृतस्य पुरुषार्थापवर्गे लिभ्यते ८७ बहु-
का लं छन्दसि। पूर्वेण नियमात्प्राप्तः। किं विधीयते छन्दसि विषये उपपदान्तरेऽपि हन्ते-
र्बहुलं क्विप्प्रत्ययो भवति। योमातृहा पितृहा नवभवति। पितृहा भ्राता ८८ सुकर्मपा-
८९ पमन्त्रपुण्येषु कृञः। कर्मणीति वर्तते। तदसंभवात्तु सुपूर्वं वृत्तिश्चित्वा पदविशेषा-
९ नाविशेषणं स्यादिषु कर्मसूपपदेषु करोतेर्धातोः। क्विप्प्रत्ययो भवति। सुकृत्। कर्म-
कृत्। पापकृत्। मन्त्रकृत्। पुण्यकृत्। छन्दस्यपि नियमार्थोऽयमारंभः। त्रिविधश्चात्र नियम
इष्यते धातुनियमवर्जमेते त्रयः कालोपपदप्रत्ययविषयः। धातोरनियमत्वादन्य-
स्मिन्नप्युपपदे भवति शास्त्रकृत् भाष्यकृत् ८९ सोमे सुञः। कर्मणीत्येव। सोमे कर्म-
ण्युपपदे सुनोतेर्धातोः। क्विप्प्रत्ययो भवति। सोमसुत्। सोमसुतौ। सोमसुतः। अयमपि
नियमार्थ आरम्भः। चतुर्विधश्चात्र नियम इष्यते कालधातूपपदप्रत्ययविषयः। ९० अग्नौ
चेः। अग्नौ कर्मण्युपपदाच्चिनोतेर्धातोः। क्विप्प्रत्ययो भवति। अग्निचित्। अग्निचितौ।
अग्निचितः। अत्रापि पूर्ववच्चतुर्विधो नियम इष्यते ९१ कर्मण्यग्न्याख्यायां। कर्मणी-
ति वर्तते कर्मण्युपपदे चिनोतेर्धातोः। कर्मण्येव कारके क्विप्प्रत्ययो भवति अग्न्याख्या-
यां धातूपपदप्रत्ययसमुदायेन चेदग्न्याख्या गम्यते। श्येन इव चीयते श्येनचित्। कङ्क-
चित्। अग्न्याख्यायामिति किं। क्विप्प्रत्ययो भवतीति कर्मणीति वर्तमाने पुनः कर्मग्रहणं
कर्तृकारकनिमित्तं कर्मणि यथा स्यात्। कर्ममात्रे मा भूत्। सोमविक्रयी वृत्तेन वि-

क्रयी तैलविक्रयी धान्यविक्रयी अग्न्याख्यायां किं कारयउच्यते इयेनाचिदिति ९२ कर्मणी
निर्विक्रियः कर्मण्युपपदे विपूर्वात् क्रीणातेर्धातोः इनिः इनन्भवति धान्यविक्रा
यी ९३ दृशेः क्वनिप् कर्मणीत्येव दृशेर्धातोः कर्मण्युपपदे क्वनिप् प्रत्ययो भवति
मेरुदृश्वा परलोकदृश्वा अन्येभ्योपि दृश्यन्ते इति क्वनिपि सिद्धे पुनर्वचनं प्रत्यया
न्तरनिवृत्त्यर्थं ९४ राजनि युधिकृञः कर्मणीत्येव राजशब्दे कर्मवाचिन्युपपदे यु
ध्यतेः करोतेश्च क्वनिप्प्रत्ययो भवति ननु युध्यतिरकर्मकः असत्त्ववाचित्वादन्तर्भावि
तण्यर्थः सकर्मको भवति राजयुध्वा राजानं योधितवानित्यर्थः राजकृत्वा ९५ सहे च
सह इत्युपपदे चोपपदे युधेः कृञश्च क्वनिप्प्रत्ययो भवति असत्त्ववाचित्वान्नोपपदं कर्म
सहयुध्वा सहकृत्वा ९६ सप्तम्यां जनेर्डः सप्तम्यन्तउपपदे जनेर्धातोर्डः
प्रत्ययो भवति उपसरे जातो मन्दुरजः ९७ पंचम्यामजातौ पंचम्यन्तउ
पपदे जातिवर्जिते जनेर्डः प्रत्ययो भवति बुद्धिजः संस्कारजः खेदजः दुःखजः अजातावि
ति किं अश्वाज्जातः हस्तिनो जातः ९८ उपसर्गे च संज्ञायां उपसर्गे चोपपदे संज्ञाया
विषये जनेर्डः प्रत्ययो भवति समुदायोपाधिः प्रजा अवेक्षमाणाः नवीभवन्ति ९९ अनौ कर्मणि
मां अनुपूर्वाज्जनेः कर्मण्युपपदे डः प्रत्ययो भवति पुमांसमनुजातः पुमनुजः स्त्र्यनुजः
१००० अन्येष्वपि दृश्यते अन्येष्वपि उपपदेषु कारकेषु च जनेर्डः
मनुजः द्विजः परिजाः ब्रह्मज्याः प्रजाः
त्ययो भवति सप्तम्यामित्युक्तं असप्तम्यामपि दृश्यते न जायते अजः द्विर्जाता द्विजाः प
चम्यामजाताविति उक्तं जातावपि दृश्यते ब्राह्मणो जातो धर्मः क्षत्रियाज्जातो युद्धः उपसर्गे च संज्ञा
यामित्युक्तं असंज्ञायामपि दृश्यते अभिजाः परिजाः केशाः अनौ कर्मणीत्युक्तं अकर्म
ण्यपि दृश्यते अनुजातः अनुजः ... स ... चाधिकारोपि ... तेन धातोरप्य
न्यत्र ...

दापि भवति कारकांतरे च परिखात्ता परिखातवान्वा १०२ निष्ठा। क्तक्तवतू निष्ठेत्युक्तं
स निष्ठासंज्ञकः प्रत्ययो भूते भवति कृतः कृतवान् निष्ठायामितरेतराश्रयत्वा
का देषा सिद्धिः संज्ञायां कृतायां च तं जायते सत्यां च तस्मिन्संज्ञा भवितव्यं नैष दोषः
शि भाविनी संज्ञा विज्ञायते संभूते भवति यस्योत्पन्नस्य निष्ठेति संज्ञा भवतीति सा
का मर्थ्यात्तु क्तक्तवत्वोर्विधानमेतत् आदिकर्मणि निष्ठा वक्तव्या प्रकृतः कटं देवद
त्तः प्रकृतवान् कटं देवदत्तः १०२ सुयजोर्ङ्वनिप् सुनोतेर्यजतेश्च ङ्वनिप्प्रत्ययो
१७८ भवति सुत्वा सुत्वानौ सुत्वानः यज्वा यज्वानौ यज्वानः १०३ जीर्यतेरतृन् भूते प्रत्यय
८६ जीर्यतेर्धातोर्भूते तृन्प्रत्ययो भवति जरन् जरंतौ जरंतः वासरूपेण निष्ठा जीर्णः जीर्ण
वान् १०४ छंदसि लिट् भूतसामान्ये छंदसि विषये भूते लिट् प्रत्ययो भवति अहं सूर्य
मुभयतो ददर्श अहं द्यावापृथिवी आ ततान ननु च छंदसि लुङ्लङ्लिटः इति सामा
न्येन लिड्विहित एव धातुसंबंधे तद्विधिरयं त्वविशेषेण १०५ लिटः कानज्वा लिटः का
नजित्ययमादेशो वा भवति योग्निं चिक्यानः वरुणं सुषुवाणः न च भवति अहं द्यावा
पृथिवी आततान लिड्ग्रहणं किं पूर्वस्यैव प्रकृतस्यादेशविधाने विभक्तिविपरि
णामो मा भूत् छंदसि लिट्मात्रस्य यथा स्यात् अनूयो विपरोक्षे विहितः तस्याप्ययमादेशो
भवति १०६ क्वसुश्च छंदसि लिटः क्वसुरादेशो भवति जक्षिवान् पपिवान्
न च भवति अहं सूर्यमुभयतो ददर्श योगविभाग उत्तरार्थः १०७ भाषायां सदवस
श्रुवः सदवसश्रु इत्येतेभ्यो धातुभ्यः परस्य लिटो भाषायां विषये वा क्वसुरादेशो
भवति आदेशविधानात् लिडपि साधुर्भवति उपसेदिवान् कौत्सः पा
णिनिं उपाससाद अनूषिवान् कौत्सः पाणिनिं अन्ववात्सीत् अन्व

वसत् अनूवास उपशुश्रुवान् कौत्सः पाणिनिं उपाश्रौषीत् उपास्थाणीत् उपशुश्राव
लुङ्लङ्विषये चित्पुरस्तादनुवृत्तिर्भवति ।१०८ उपेयिवाननाश्वाननूचानश्च ।
उपेयिवान् अनाश्वान् अनूचान इत्येते क्वस्वन्तानिपात्यन्ते उपपूर्वादिणः क्वसुर्द्विर्व
चनमभ्यासदीर्घत्वं च नत् सामर्थ्यादेकादेशप्राप्तिबाधः । तत्र वस्वेकाजाद्घसा
इत्यनेकाचत्वादिट् च न प्राप्नोति सति पात्यते अभ्यासस्य आवण धातुस्वरूपस्य
यणादेशः । उपेयिवान् क्रादिनियमात् प्राप्तश्च वस्वेकाजाद्घसां इति प्रतिषिद्धं
सपुनरिट् प्रतिप्रसूयते तेनाजादेनानजाये भवति उपेयुषा उपेयुषे नचात्रोप
सर्गनियमस्तत्र अन्योपसर्गपूर्वात् केवलाच्च भवत्येव समीयिवान् ईयिवान्
चनानुवृत्तेश्च पूर्ववल्लुङादयोपि भवन्ति उपागात् उपैत् उपेयाय नाश्नातेर्नञ्पू
र्वात्क्वसुर्निपात्यते इडभावश्च अनाश्वान् नाशीत् नाश्नात् नाश वचेरनुपूर्वात्
कर्तरि कानच् निपात्यते अनूचानः अन्ववोचत् अन्वब्रवीत् अनूवाच ।१०९ लुङ् ।भू
तेर्थे वर्तमानाद्धातोर्लुङ् प्रत्ययो भवति अकार्षीत् अहार्षीत् वसेर्लुङ् रात्रिशेषे
जागरणसन्ततौ यंभूतानुषितः अमुत्रावात्सं ।११० अनद्यतने लङ् भूते इत्येव अ
नद्यतने इति बहुव्रीहिनिर्देशः अविद्यमानाद्यतने भूते वर्तमानाद्धातोर्लङ्प्र
त्ययो भवति अकरोत् अहरत् बहुव्रीहिनिर्देशः किं अद्य ह्यो वा भुक्ष्महीति व्यामि
श्रे मा भूत् परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये लङ् वक्तव्यः अरुणद्यवनः
साकेतम् अरुणद्यवनो माध्यमिकान् ।१११ अभिज्ञावचने लृट् अभिज्ञा स्मृतिः तद्वचने उ
पपदे अनद्यतने लृट् प्रत्ययो भवति लङोपवादः अभिजानासि देवदत्त काश्मी
रेषु वत्स्यामः अभिजानासि देवदत्त मगधेषु वत्स्यामः वचनग्रहणं पर्यायार्थं

भिजानासि बुध्यसे स्मरसि चेतयसे इति ॥११२ न यदि ॥ यच्छब्दसहिते अभिज्ञावचने उपपदे
लृट् प्रत्ययो न भवति पूर्वेण प्राप्तः प्रतिषिध्यते अभिजानासि देवदत्त यत्का-
श्मीरेष्ववसाम यन्मगधेष्ववसाम वासमात्रेण नु स्मर्यते न तु अपूर्वं किंचिल्ल-
क्षितं पदे ॥११४ विभाषा साकांक्षे ॥ यदीति नानुवर्तते उभयत्र विभाषेयं अभिज्ञावच-
ने उपपदे यच्छब्दसहिते केवले च विभाषा लृट् प्रत्ययो भवति साकांक्षश्चेत्प्र-
योक्ता लक्ष्यलक्षणयोः संबंधे प्रयोक्तुः साकांक्षा भवति अभिजानासि देवदत्त का-
७८ श्मीरेषु वत्स्यामः तत्रौदनं भोक्ष्यामहे अभिजानासि देवदत्त काश्मीरेष्ववसाम
८९ तत्रौदनमभुञ्ज्महि अभिजानासि देवदत्त यत्काश्मीरेषु वत्स्यामः तत्रौदनं भोक्ष्या-
महे अभिजानासि देवदत्त यत्काश्मीरेष्ववसाम तत्रौदनमभुञ्ज्महि वासो लक्षणं
भोजनं लक्ष्यं ॥१४ परोक्षे लिट् ॥ भूतेनद्यतने इति वर्तते तस्य विशेषणमपरोक्षे परोक्षा
भूतानद्यतनपरोक्षेर्थे वर्तमानाद्धातोर्लिट् प्रत्ययो भवति ननु धात्वर्थः सर्वः
परोक्ष एव सत्यमेतदस्ति लोके तत्र अपि तु प्रत्यक्षाभिमानः स यत्र नास्ति तत्परोक्ष-
मिति उच्यते चकार जहार ... विषये पिचितवान् परोक्षता नाभवत्येव तद्य-
था सुप्तोहं किल विललाप मत्तोहं किल विचचार अत्यंतापह्नवे लिट् वक्त-
व्यः कलिंगेषु स्थितोसि नाहं कलिंगान्जगामेति दक्षिणापथे किंचिदुनिष्ठं कुंतवा-
न् नाहं दक्षिणापथं प्रविवेश ॥११५ हशश्वतोर्लङ् च ॥ भूतानद्यतनपरोक्षे इति लिटि प्राप्ते
हशश्वतोरुपपदयोर्लङ् प्रत्ययो भवति चकारात् लिट् च इति हाकरोत् इतिह-
करोत् शश्वदकरोत् शश्वच्चकार ॥११६ प्रश्ने चासन्नकाले ॥ भूतानद्यतनपरोक्षे इति
वर्तते तस्यापि विशेषणमेतत् पृष्टव्यः प्रश्नः आसन्नकाले पृच्छ्यमाने भूतानद्यतन

परोक्षेऽर्थे वर्तमानाद्धातोर्लङ्·लिटौ प्रत्ययौ भवतः। कश्चित्कंचित्पृच्छति अगच्छद्देवदत्तः
जगाम देवदत्तः। अयजद्देवदत्तः। इयाज देवदत्तः। पृच्छति किं देवदत्तो जगाम
आसन्नकाल इति किं भवति पृच्छामि जघान कंसं किल वासुदेवः। ११७ लट् स्मे भूता
नद्यतनपरोक्षे इति वर्तते स्मशब्द उपपदे भूतानद्यतनपरोक्षे चोल्लट् प्रत्ययो भ
वति। लिटोऽपवादः। नडेन स्म पुराधीयते ऋग्युः स्म पुराधीयते ११८ अपरोक्षे च
परोक्षे च भूतानद्यतने वर्तमानाद्धातोः स्मशब्द उपपदे लट् प्रत्ययो भव
ति एवं स्म पिता ब्रवीति इति स्मोपाध्यायः कथयति ११९ ननौ पृष्टप्रतिवचने अ
नद्यतनपरोक्षे इति निवृत्तं भूतसामान्यविधिरयं ननुशब्द उपपदे पृष्टप्रतिव
चने गम्यमाने भूते लट् प्रत्ययो भवति अकार्षीः कटं देवदत्त। ननु
करोमि भोः अवोचत् किंचिद्देवदत्त। ननु ब्रवीमि भोः। पृष्टप्रतिवचन इति
किं ननु अकार्षीन्माणवकः। १२० नन्वोर्विभाषा भूत इत्येव नन्वित्येतयोश्चोप
पदे पृष्टप्रतिवचने विभाषा लट् प्रत्ययो भवति अकार्षीः कटं देवदत्त न करो
मि भोः नाकार्षं अहं नु करोमि अहं न्वकार्षं १२१ पुरि लुङ् चास्मे अनद्यतने अप
रोक्षे इति वर्तते पुराशब्द उपपदे स्मवर्जिते भूतानद्यतने विभा
षा लुङ् प्रत्ययो भवति लट् च तत्सामर्थ्यात्परोक्षे च यथाविषयं अन्योऽपि प्रत्ययो भ
वति वसन्तीह पुरा छात्राः अवात्सुरिह पुरा छात्राः अवसन्निह पुरा छात्राः ऊषु
रिह पुरा छात्राः अस्मे इति किं नडेन स्म पुराधीयते १२२ वर्तमाने लट् प्रारब्धोऽपरि
समाप्तश्च वर्तमानः वर्तमानेऽर्थे वर्तमानाद्धातोर्लट् प्रत्ययो भवति भवति पच
ति १२३ लटः शतृशानचावप्रथमासमानाधिकरणे भवति पचन्तं देवदत्तं प
श्य पचमानं पश्य पचता पचमानेन कृतं अप्रथमासमानाधिकरणे इति किं
देवदत्तः पचति लडिति वर्तमाने पुनर्लड्ग्रहणमधिकविधानार्थं क्वचित्

प्र मास मानाधिकरणेपि भवति सन्तु ब्राह्मणः अस्ति ब्राह्मणः विद्यमानः विद्यते
तु कुर्वन् कुरुते अधीयानः अधीते माशाक्षौद्रो मा पचन्त मा पचमानः के
चिद्विभाषाग्रहणं इहानुवर्तयन्ति नन्वो विभाषेत्यतः सा च व्यवस्थित विभा
का षा तेन यथा दर्शनं प्रयोगो गानेतव्यः १२४ संबोधने च प्रथमा समानाधिकरण
शि र्थ आरम्भः संबोधनविषये लटः शतृशानचावादेशौ भवतः हे पचन् हे पचमा
का न १२५ लक्षणहेत्वोः क्रियायाः लक्ष्यते चिह्न्यते येन तल्लक्षणं जनको हेतुधात्व
१८० र्थविशेषणं चैतत् लक्षणे हेतौ चार्थे वर्तमानाद्धातोः परस्य लटः शतृशान
११० चावादेशौ भवतः तौ चेल्लक्षणहेतू क्रियाविषयौ भवतः शयाना भुंजते यव
नाः तिष्ठंतोनुशासति गणकाः हेतौ अर्जयन्वसति अधीयानो वसति लक्षणहेत्वो
रिति किं पचति च पठति च क्रियाया इति किं द्रव्यगुणयो मभूत् यः कंपते सोश्व
त्थः यदुत्प्लवते तल्लघु यन्निषीदति तद्गुरु लक्षणहेत्वोरिति निर्देशः पूर्वनिपा
तव्यभिचारलिंगं १२६ तौ सत् तौ शतृशानचौ सत्संज्ञौ भवतः तौ ग्रहणं उपाध्य
संसर्गार्थं शतृशानचमात्रे स्यसंज्ञा भवति ब्राह्मणस्य कुर्वन् ब्राह्मणस्य कुर्वाणः
ब्राह्मणस्य करिष्यन् ब्राह्मणस्य करिष्यमाणः सद्वत्सा पूरणगुणसहितार्थ
सदव्ययतव्यसमानाधय १२७ पूङ्यजोः शानन् पूङो यजश्च शानन् प्रत्ययो
भवति पवमानः यजमानः प्रतिपत्तव्यः शानन्नादेशः कथं सोमं प
वमानः नडमाघ्नो न इति बधीर्घाति बोधइति ग्रन्तिकृत्याचाणानु लटः शतृशान
जि त्यतप्रभृति ताच्छील्यादयो मकारान्तविषयः शतृशानचौ स्याद्विषयानु १२९ ताच्छी
ल्यवयोवचनशक्तिषु चानश् ताच्छील्यं तत्स्वभावता वयः शरीरावस्था यौवना
दिः शक्तिः सामर्थ्यं ताच्छील्यादिषु गम्यमानेषु धातोश्चानश् प्रत्ययो भवति ता
च्छील्ये तावत् कतीह मुंडयमानाः कतीह भूषयमाणाः वयोवचने कतीह क
वचं पर्यस्यमानाः कतीह शिखंड वहमानाः शक्तौ कतीह निघ्नानाः कतीह

पच्यमानः ॥ १२९ इङ्धार्योः शत्रकृच्छ्रिणि ॥ इङो धारेश्च शतृप्रत्ययो भवति अकृच्छ्रिणि कर्तरि
अकृच्छ्रं सुखसाध्यो यस्य कर्तुर्धात्वर्थः सो कृच्छ्री । अधीयन् पारायणं धारयन् उपनिषदं
अकृच्छ्रिणीति किं कृच्छ्रेणाधीते कृच्छ्रेण धारयति ॥ द्विषोमित्रे ॥ अमित्रे । शत्रुः अमित्रे कर्त
रि द्विषो धातोः शतृप्रत्ययो भवति । द्विषन् द्विषन्तौ द्विषन्तः अमित्र इति किं द्वेष्टि पतिं
भार्या ॥ सुञो यज्ञसंयोगे यज्ञसंयोगे यज्ञसंयोगः यज्ञसंयोगे भिषवे वर्तमानात्
सुनोतेर्धातोः शतृप्रत्ययो भवति सर्वे सुन्वन्तः सर्वे यजमानाः सत्रिण उच्यन्ते अत्र सं
योगः प्रधानभूतः कार्यं प्रत्ययार्थः याज्ञिकेषु मा भूदिति यज्ञसंयोग इति किं सुनो
ति सुरां शूद्रः अर्हः प्रशंसायां प्रशंसा स्तुतिः प्रशंसायां विषये अर्हतेर्धातोः शतृप्रत्ययो
